श्रीभर्तृहरिविरचितं

विज्ञानशतकम्।

प्रज्ञाख्यटीकोपोद्घातटिप्पण्यादियुतम्।

मूल्यमाणका अष्ट।

'Vidnyâna sâtaka.'

Bhartr□hari

Digitized by Google

श्रीभर्तृहरिविरचितं

विज्ञानशतकम्।

प्रज्ञाख्यटीकोपोद्घातटिप्पण्यादियुतम्।

मूल्यमाणका अष्ट।

Digitized by Google

Digitized by Google

श्रीभर्तृहरिविरचितं

विज्ञानशतकम् ।

Digitized by Google

Digitized by Google

BHARTRIHARI'S

VIDNYÂNA ŚATAKA.

EDITED

WITH INTRODUCTIONS, TIKA AND NOTES

BY

K. B. Ghule.

Nagpur.

1897

All rights reserved.

Digitized by Google

Digitized by Google

BHARTRIHARI'S

VIDNYÂNA ŚATAKA.

EDITED

WITH INTRODUCTIONS, TIKA AND NOTES

BY

K. B. Ghule.


Nagpur.

1897

All rights reserved.


Digitized by Google

Ind L 728.4
~~Ind h 728.4~~
~~IV. 6443~~



Ward fund

Printed at the GORAKSHANA PRESS, Nagpur.



Digitized by Google

PREFACE.

A TINY preface to a tiny book is in accordance with the fitness of things. The author must therefore tell the long story of his difficulties in short. Difficulties there must be in the way of every good object. But when they come from quarters where a man rightly looks for help they are very likely to chill the energy of a young man of the type of the author of this book. The chief difficulty to the author, in addition to the one of getting a clear and correct manuscript of the text, was the want of reference-books; but thanks to the generosity of his few friends who materially helped him, he succeeded in overcoming it, greatly enhanced though it was by some gentlemen from whom he least expected it.

K. B. G.

Digitized by Google

Ind h 728.4
~~Ind h 728.4~~
~~IV. 6443~~

HARVARD COLLEGE
JUL 28 1900
LIBRARY.

Ward fund

Printed at the HORAE SOLITARIAE PRESS, Yarnton.

HARVARD UNIVERSITY
LIBRARY
OCT 15 1996

Digitized by Google

PREFACE.

A TINY preface to a tiny book is in accordance with the fitness of things. The author must therefore tell the long story of his difficulties in short. Difficulties there must be in the way of every good object. But when they come from quarters where a man rightly looks for help they are very likely to chill the energy of a young man of the type of the author of this book. The chief difficulty to the author, in addition to the one of getting a clear and correct manuscript of the text, was the want of reference-books; but thanks to the generosity of his few friends who materially helped him, he succeeded in overcoming it, greatly enhanced though it was by some gentlemen from whom he least expected it.

K. B. G.

Digitized by Google

ERRATA.

Page	8,	Line	19	of Sans. Intro for	१८ read ९९
,,	xvi	,,	5	,, Eng. Intro ,,	sensetion, read sen
,,	xvi	,,	12	for	flashes, read flash.
,,	,,	,,	13	,,	Expression, read Expressions.
,,	xviii	,,	9	,,	traceable, read traceable.
,,	xx	,,	8	,,	to insert, read when he inserted.
,,	,,	,,	13	,,	has, read have.

TEXT AND TIKA

,,	1	,,	12	,,	० मल read ० ममल.
,,	2	,,	2	,,	० मद्वतीयं read ० मद्वितीयम्
,,	9	,,	4	,,	भ्रन्ते read भ्रान्ते
,,	9	,,	11	,,	आधिष्टानेन read अधिष्ठानेन
,,	10	,,	24	,,	कष्टं कचग read कष्टं क च
,,	12	,,	19	,,	० द्वजितै: read ० द्वेजितै:
,,	13	,,	15	,,	श्रुणु read शृणु
,,	13	,,	21	,,	श्रुणु read शृणु
,,	13	,,	29	,,	० त्तिष्टत: read त्तिष्ठत:
,,	14	,,	13	,,	सज्जनां read सज्जनानां
,,	16	,,	28	,,	घञ्चा read चञ्चा
,,	24	,,	27	,,	पुमान्सो read पुमांसो
,,	25	,,	6	,,	द्वतं read द्वैतं
,,	28	,,	17	,,	शारिरीषु read शारीरीषु
,,	28	,,	18	,,	बाधिरो read बधिरो
,,	31	,,	19	,,	० संख्यकानां read संख्याकानां
,,	32	,,	10	,,	हिक्का read हिक्का
,,	35	,,	16	,,	मोक्षेच्छा read स्वर्गेच्छ

Page 1, line 12 of Notes for Ramarshi read Ramashrami.

Digitized by Google

उपोद्घातः।

विदांकुर्वन्तु विन्दवृन्दाः यत्खलु निखिलनृपतिवंशावतंसभूतेन भूपेन भर्तृहरिणा भुवनत्रयविश्रुतं श्लोकशतकत्रयं निरमायीति सुविश्रुतमेव। तेनैवच राजशेखरेण वाक्यपदीयं नाम कश्चित्प्रबंधो व्यरचीति विद्वज्जनसंमता चिरकालपरिचिता च किंवदन्ती। अपि च तन्नभवन्तस्तैलंगप्रभृतयः कोविदाः कोलम्बकाख्यात्कस्माच्चनाङ्गलसुधियो विद्यते चान्यदेतन्निर्मितं चतुर्थमप्येकंशतकमित्यधिगम्य किं तद्भवेत्कुत्र वा तत्स्याद्भवेन्न वेति चाद्यावधि संशेरतेस्म बहवः। परञ्च तेनैव कविवरेण प्रणिहितात्मशतकत्रयनिर्माणकौशलं सुपेशलं सकलविद्वन्मनोमोहनं ब्रह्मविद्याविषयकं विज्ञाननाम चतुर्थशतकमिदमस्मत्प्रपितामहचरणानां वैय्याकरणकेसरीत्यधिगतपदवीकानां भट्टसदाशिवशर्मणां ग्रन्थसंग्रहे यदृच्छया सम्प्राप्तमस्माभिर्वर्षद्वयात्प्राक्। तच्च सुजीर्णपत्रं गलिताक्षरमशुद्धबहुलञ्चेति प्रत्यन्तरप्रेप्सयेयन्तं कालमत्र चान्यत्र निरूपयद्भिरस्माभिर्नाधिगतं तत्कुत्रचिदपि। अथैवं विफलप्रयत्नैरस्माभिस्तातपादानां भाऊशास्त्रिणामाचार्यचरणानां भट्टजीशास्त्रिणाञ्च साहाय्येन तदेव यथामति संशोध्य सोपोद्घातांगलटिप्पण्या प्रज्ञाख्यया व्याख्यया च सनाथीकृत्य समुपायनीकृतमस्ति समास्वादितशतकत्रयमाधुर्य्याणां विद्वद्वर्य्यधुर्य्याणाम्। परञ्चेक्तकाव्यानां शतकचतुष्टयात्मकानां निर्मातैको भर्तृहरिरेव न वा कदा वा सोऽभूदित्यादिविषयं जिज्ञासमाना विद्वांसः पाश्चात्याः पौरस्त्याश्च चिरं विप्रतिपद्यन्ते। अन्यनिर्मितानां सुभाषितानां शतकचतुष्टयरूपेण संकलयिता भर्तृहरिर्न तु तेषां स्वयं विरचयितेति केचित्। शतकचतुष्टयस्य वाक्यपदीयस्य च निर्माता स एवैको नान्यः कश्चनेत्यन्ये। तथा च खिस्ताद्वीयप्रथमशतकावसाने द्वितीयशतकारम्भे वा स आसीदिति केचित्। खिस्ताद्वीयसप्तमशतकार्धसमये सोऽभूदित्यपरे। एवं बहवो विप्रतिपन्ना नाद्यापि किञ्चिन्निश्चिक्युः। तथापि चतुर्णामपि शतकानां वाक्यपदीयस्य च निर्माता भर्तृहरिभूपतिः खिस्ताद्वीयप्रथमशतकावसाने द्वितीयशतकारम्भसमये वा न्यवसदिति काशीनाथसूरिमतमेव युक्तियुक्तमितरेभ्यः समंजसमित्यंगीकृतमस्ति बहुभिः। परञ्चेदानीमस्मदधिगतचतुर्थशतकावलोकनात्प्रभृति

Digitized by Google

नास्माकमत्र तैलंगमते प्रत्येति चेतः । एतस्मात्तु चतुर्थाद्विज्ञानशतकात्ज्ञायते न हि भर्तृहरिः खिस्ताद्वीयप्रथमशतकावसानसामयिको नापि द्वितीयशतकारम्भकालिकः किन्त्वसौ खिस्ताब्दीयसप्तमशतकार्धसमये प्राणिति स्मेति ।

अथैवमस्मदुपन्यस्तमतोपोद्बलकत्वाद्विज्ञानशतकस्य किमेतत् शतकत्रयनिर्माणकुशलेन भर्तृहरिणैव निर्मितमाहोस्विदन्येन वा केनचिदिति निश्चिकीषया प्रमाणान्याभ्यन्तराणि बाह्यानि च ब्रूमः । विज्ञानशतकस्यान्तिमपद्ये शतकचतुष्टयं विरचितं मयेति प्रतिजानीते कविः । तद्यथा—

बुधानां वैराग्यं सुघटयतु वैराग्यशतकं
गृहस्थानामेकं हरिपदसरोजप्रणयिनाम् ।
जनानामानन्दं वितरतु नितान्तं सुविशद-
मयं शेषव्याख्यागलिततमसां शुद्धमनसाम् ॥

पद्यमेतदस्पष्टमपि भर्तृहरेर्विज्ञानशतककर्तृकत्वं स्पष्टतरं बोधयति । विज्ञानशतकमेतद्वैराग्यशतकनिर्मात्रैव केनचित्कविवरेण निर्मितमित्यत्र निराकरोति संशयं पद्यमेतत् । अन्यच्च समानकर्तृकाणां काव्यानां यन्नैसर्गिकं विचारकल्पनासाम्यं पद्यरचनारुचिसादृश्यं वर्तते तदत्रापि शतकचतुष्टये विनायासं प्राप्यते सूक्ष्मदर्शिना वाचकेन । दर्श्यते च दृष्टमस्माभिर्दिङ्मात्रम् ।

सहनीयतेजः श्लो० ९९—शान्तायतेजसे, वै० श० १; 'अन्नाशाय सदा रटन्ति' इत्यादिः श्लो० ९५— दीना दीनमुखैरित्यादिः वै० श० ८; क्षुत्क्षामकंठाः श्लो० १८— क्षुत्क्षामोऽपि; वेदो निर्वेदमागादित्यादिः श्लो० ६७— पुरा विद्वत्तासीत् वै० श० २८; 'अजरममरं चिन्तय मनः परब्रह्म' श्लो० १९— 'तस्मादनन्तमजरं परमं विकासि तद्ब्रह्म चिन्तय' वै० श० ७६; 'तां कांशीं नोभजन्ते किमिति सुमतयो दुःखभारं वहन्ते' श्लो० ३८— 'तां कांशीं परिहृत्य हन्त विबुधैरन्यत्र किं स्थीयते' वै० श० ९६; 'नाभ्यस्तो धातुवादो' श्लो० ४७— 'नाभ्यस्ता भुवि वादिवृन्ददमनी विद्या' वै० श० ८९; 'सर्वोपायविनाशनैकचतुरः कालाय तस्मै नमः' श्लो० ९९—'सर्वं यस्य वशादगात्स्मृतिपथं कालाय तस्मै नमः' वै० श० ३७; 'जरया जीर्णीकृतायां तनौ' श्लो० ९४—'जराजीर्णैरंगैः' वै० श० ११२; आढ्यः कश्चिदपण्डितोऽपि'....इत्यादि श्लो० ८२— 'यस्यास्ति वित्तं स नरः कुलीनः' नी० श० ४१:

Digitized by Google

, ध्यानस्यचोच्छित्तये ' श्लो० १०२–'संसारविच्छित्तये ' वै० श० ११. ' यद्येता मदनेषवो मृगदृशः ' इत्यादिः श्लो० ९६–' कः कुर्वीत शिरः प्रणाममलिनं म्लानं मनस्वीजनो यद्वित्रस्तकुरंगशावनयना न स्युः स्मरास्त्रं स्त्रियः ' शृ० श० ११; ' प्रथयति प्रीतिञ्च कष्टञ्च नः ' श्लो० ९३–मुदञ्च ग्लानिञ्च प्रथयति ' शृ० श० ४०; ब्रह्मज्ञानसुधाकरः' श्लो० ९३–'ज्ञानतारापिपस्य ' शृ० श० ९०; ' कन्दाम्बुपर्णाशिनाम् ' श्लो० ९१–'वाताम्बुपर्णाशनाः ' शृ० श० ९९; ' दष्टप्रायं....कालसर्पेण ' श्लो० ३९–'दष्टो न तच्चक्षुषा ' शृ० श० ८९; ' अर्थार्थिततया ' श्लो० २१–'आत्मबोधः ' शृ० श० ९२ एतदुभयत्र व्यधिकरणबहुव्रीहिरपि सप्तमीतरविभक्तिक इति सादृश्यं द्रष्टव्यामिति दिक्। किञ्च लिखितपुस्तकान्ते ' इति श्रीभर्तृहरिविरचितं विज्ञानशतकं चतुर्थं ' मिति स्पष्टमुपलभ्यते। अन्यच्च हरिहरोपाध्यायविरचिते (काव्यमालायां प्रसिद्धे) भर्तृहरिनिर्वेदनाटक इवात्रापि भर्तृहरिर्भार्या प्रति बालाशब्देन व्यवहरति। अपि च तत्रैव नाटके पञ्चमाङ्के निर्वेदमापन्नो भर्तृहरिः काशीं गन्तुकामो राज्यादिकं सन्यस्य भार्यादीन्निवर्तयिष्यमाणो यद्वदन्निर्दिष्टस्तत्रभवता कविवरेण हरिहरेण तदेवात्राप्याह भर्तृहरिः " हेपुत्राः " इत्यादिनैकाधिकशततमे पद्ये। पुनश्च तत्रैव ' विज्ञानेन विकृष्य निष्ठुरतरं नीये परब्रह्मणि ' इत्यपि दृश्यते। तत्किमुक्तेन बहुना भवति खल्वेतस्मात्प्रमाणकलापाद्विज्ञानशतकस्य भर्तृहरिनिर्मातृकत्वे निरवकाशः संशयः।

अथैवमस्य विज्ञानशतकस्य भर्तृहरिनिर्मातृकत्वं प्रतिष्ठाप्य शतकचतुष्टयनिर्मातुस्तस्येदानीं जीवनसमयनिर्णयार्थं प्रयतामहे। शककर्तुर्विक्रमादित्यस्य शतककर्तुर्भर्तृहरेश्च सहोदरत्वं जोघुष्यमाणामपि किंवदन्तीं प्रमाणमाश्रित्य पण्डितवरेण काशीनाथसूरिणा निर्णीतं तत्समयं प्रामाणिकप्रमाणान्तराभावाद्दूषयं मन्महे। यदपि वाक्यपदीयशतकचतुष्टययोः समानकर्तृकत्वमङ्गीकृत्य तैर्निर्णीतं तदपि तत एव न रोचते नः। न हि कोल्लुकबोहलेनौ प्रमाणम्। नापि केवलं शतशोऽप्यांग्लपण्डिताः प्रमाणं भवितुमर्हन्ति पौरस्त्या वा। प्रमाणन्त्वत्र शाद्धमपि युक्त्यनुपानादिपुष्टमेव। तदेवाश्रित्येदानीमस्माभिर्जिज्ञासा समारभ्यते। अस्मिन्विज्ञानशतके दृश्यमानाद्वैदान्तमतात्ज्ञायते नहि भर्तृहरिः शंकराचार्यात्पूर्वकालिकः किन्त्वाचार्यादर्वाचीन एवेति। यद्यपि वेदान्तवादिन औपनिषदाः प्राग्आचार्यात्प्रादुरासन्निति सत्यं तथापि तदानीं " ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः " इति

Digitized by Google

शुद्धाद्वैतमतं प्रतिपादयतां सत्त्वे प्रमाणं नाधिगम्यते । एतन्मतखण्डने प्रवृत्तैः काशीनाथसूरिभिरपि प्रामाणिकं प्रमाणं नोपन्यस्तं कुत्रापि । यत्तूक्तं तैः " कान्यकुब्जपतेर्हर्षवर्धनस्य समय औपनिषदाः केचनासन्नि " तितद्दुर्बलमिति नैतन्मतं खण्डयितुमलम् । एवञ्च न केवलमेतन्मतखण्डनसमर्थं सुदृढं प्रमाणं किञ्चिन्नलभ्यते प्रत्युतैतदुपोद्बलकानि बहूनि प्रमाणान्यतैव शतके दृश्यन्ते । नहि केवलं प्राचीनमतैकोपन्यासकारः शंकरः किन्त्वन्यमतनिरपेक्षं स्वबुद्धिप्रस्थापितं स्वतन्त्रमपि किञ्चिन्मतं स उपन्यास्थदिति निर्विवादम् । तदेवात्र चतुर्थशतके संगृहीतं भर्तृहरिणेति प्रदर्श्यते । " यत्सत्तया शुचि विभाति " इति द्वितीयपद्ये ' यदध्यस्तं सर्वं स्रजि भुजगवद्भाति पुरतो महामायोद्गीर्णं गगनपवनाद्यं तनुभृताम् । भवेत्तस्याभ्रान्तेर्मुररिपुराधिष्ठानमुदये यतो न स्याद्भ्रान्तिर्निरधिकरणा क्वापि जगति । " इति चतुर्विंशतितमे ' गगननगराकारसदृशे ' इति द्वादशे पद्येऽन्यत्र च ग्रथितार्थस्य श्रीशंकराचार्यैकप्रतिपादकत्वे कः संदेहः ।

किञ्चोपनिषदो मृद्घटदृष्टान्तेन जीवात्मपरमात्मनोरैक्यं प्रतिपादयन्ति । आचार्यास्तु पुना रज्जुसर्पदृष्टान्तेन गंधर्वनगरदृष्टान्तेन वा जगन्मिथ्यात्वं प्रतिपादयन्ति । तथा च शांकरमतं प्रतिपादयद्भिर्भाण्डारकरोपनामकैः डाक्टररामकृष्णसूरिभिरप्युक्तमिन्दूरनगरव्याख्यानसमये ब्राह्ममंदिरे "*शांकरमद्वैतं श्रुत्यद्वैतञ्च नाभिन्नम् । ब्रह्म सत्यं जगदिदं भ्रान्त्यात्मकं मृगजलं गंधर्वनगरञ्च यथेति शंकराचार्यः । श्रुत्यद्वैतं भिन्नम् । (तत्र) जीवात्मपरमात्मनोरैक्यं मृद्घटदृष्टान्तेन विशदीकृतम् । शंकराचार्य्या रज्जुसर्पदृष्टान्तमुपन्यस्यन्ति । श्रुतिषु तु जगद्ब्रह्मणोरैक्यं मृद्घटदृष्टान्तेन प्रदर्शितम् । .....श्रुतिषु यद्यप्यद्वैतं लभ्यते तथापि तच्छांकराद्वैताद्भिन्नमिति निष्कर्षः । " भट्टमोक्षमुल्लरस्तु तमेवार्थं स्फुटीकुर्वन्नाह—" यो हीदानीमुत्क्रान्तिः परिणामो विकासश्चोच्यते सोप्युपनिषत्सु नेति न । (तत्र) दधिपयसोर्दृष्टान्तो दत्तः । दधि तु वस्तुतः पय एव । रूपमात्राद्भिन्नम् । तथापि न केवलमेकमेवाद्वितीयं ब्रह्म किन्तु तत्स्वयंपूर्णं विकाररहितञ्चेति हेतोर्दधिदृष्टान्तस्यानुपयुक्तत्वमवलोक्य शंकरोऽन्यन्मतं स्वीचकार ।.....शंकरो विवर्तवादमंगीकृतवान् । तत्स्वरूपं यथा.....यतः रज्जौ

---

* ज्ञानप्रकाशाद्वृत्तपत्रादुद्धृत्य गीर्वाणभाषायामनूदितम् । (ज्ञानप्रकाश, मे २०, १८९७)

Digitized by Google

सर्पभ्रान्तिर्भवति तद्वदिति दृष्टान्तो दत्तः ।.....यतः शुक्त्यभावे रजतमेव न स्यात् ।.....ब्रह्म विना जगन्मिथ्यात्वं नैव संभवति । सोपाधिकं विना निरुपाधिकं न स्यात्* " । सर्वमेतद्भर्तृहरिणा चतुर्विंशतितमे पद्ये निबद्धं दृष्टमेव । तस्माद्भर्तृहरिः शांकरमतमेव पद्यरूपेण ग्रथितवानिति न शक्यं शंकितुम् । किञ्चास्मिन् शतके चतुःषष्ठितमे पद्ये प्रत्यगात्मेति पदं दृश्यते । तच्च सर्वासामुपनिषदामेकतमस्यामेव कठवल्ल्यां तदप्येकस्मिन्नेव स्थले 'प्रत्यगात्मानमैक्षादि' त्येकवारमेव प्रयुक्तं दृश्यते । तच्च तत्रैव भाष्यकारैः सुविशदं व्याख्यातं सर्वत्र स्वभाष्येऽसकृत्प्रयुक्तञ्चास्ति । ततश्चान्यैरपि व्याख्याकारैरन्यत्र तत्संगृहीतम् । भर्तृहरिणापि तदेवानुसृतमिति भाति । नहीदं पदं भाष्यकाराच्छंकराचार्यात्प्राक्कालिकग्रन्थान्तरे संप्राप्यते । प्राप्यमाणं वा न जानीमहे । एतावता शतकचतुष्टयनिर्माता भर्तृहरिः शंकराचार्य्यानन्तरमेवाभूदिति विज्ञानशतकान्निसंशयं सिध्यति । अयमेव कस्यचन रेग्नाडाख्यस्य पाश्चात्यपण्डितस्य सिद्धान्तः । सोऽपि स्वोक्तस्य साधुत्वे संशयो नास्तीत्येवप्रतिपादयाम्बभूव ।

एवञ्चास्मत्कविर्भर्तृहरिः शंकराचार्य्यादर्वाचीन इति सिद्धान्तमधिगम्य तदाश्रयेणेदानीं तत्समयं निर्णेतुमुत्सहामहे । भगवतः शंकरस्य खिस्ताब्दीयाष्टमशतकसामयिकत्वं सर्वेषां पाश्चात्यपण्डितानामाविवादम् । परञ्चैतन्न वयं विश्वसिमः । अत्र विषये काशीनाथसूरिभी रामकृष्णसूरिभिश्च सूक्ष्मतमं निरूप्य निर्णयो निष्कृष्टः । स च काशीनाथसूरिभिः स्वसंकलितमुद्राराक्षसनाटकादावुपोद्घाते सप्रपञ्चं प्रदर्शितः । ततो ज्ञायते खिस्ताब्दीयषष्ठशतकोत्तरार्धकालिको भगवान् शंकर इति । सप्रमाणमिति तन्मतमेवावलम्ब्य नहि भर्तृहरिः खिस्ताब्दीयषष्ठशतकोत्तरार्धात्प्राक्कालिक इति सिद्धान्तयामः । सिद्धान्तितार्थोपोद्बलकं प्रमाणान्तरञ्चापि ब्रूमः । अस्मिन्नेव शतके पद्यत्रयं वर्तते । तद्यथा--

'उदासीनो देवो मदनमथनः सज्जनकुले
कलिक्रीडासक्तः कृतपरिजनः प्राकृतजनः ।

---

* शंकर बाळकृष्ण दीक्षित इत्यनेन कृतस्याध्यात्मविद्याविलासस्य २६०, २६१, २७४ पत्रेभ्य एतदुद्धृत्य गीर्वाणभाषायामनूक्तम् ।

Digitized by Google

इयं म्लेच्छाक्रान्ता त्रिदशतटिनीचोभयतटे
कथं भ्रातः स्थाता कथय सुकृती कुत्र विभयः ॥

निस्सारा वसुधाधुना समजनि प्रौढप्रतापानल-
ज्वालाजालसमाकुलाद्विपघटासंघट्टविक्षोभिता ।
म्लेच्छानां रथवाजिपत्तिनिवहैरुन्मीलिता कीदृशी-
यं विद्या भवितेति हन्त न सखे जानीमहे मोहिताः ॥

वेदो निर्वेदमागादिह नमनभिया ब्राह्मणानां वियोगा-
द्वैय्यासिक्यो गिरोऽपि क्वचिदपि विरलाः साम्प्रतं सन्ति
देशे ।
इत्थं धर्मे विलीने यवनकुलपतौ शासति क्षोणिबिम्बं
नित्यं गंगावगाहाद्भवति गतिरितः संसृतेरर्थसिद्धौ ॥

'पुराविद्वत्तासीदुपशमवतां क्लेशहतये
गता कालेनासौ विषयसुखसिध्यै विषयिणाम् ।
इदानीं तु प्रेक्ष्य क्षितितलभुजः शास्त्रविमुखा-
नहो कष्टं सापि प्रतिदिनमधोधः प्रविशति' ॥ वै० श० २८

अस्मिन्पद्यचतुष्टये क्षोणिबिम्बं शासतः कस्यचन यवननृपतेरुपद्रवात्प्रपीडितान्वेदब्राह्मणधर्मादीन् शोचति निर्विण्णः कविवरो भर्तृहरिः । अयमेव महाप्रबलो यवनभूपतिस्तदानींतनेन केनचिद्**दाल्बिरुनी**समाख्येन (Albiruni) प्रवासिना वर्णित इति गुणसाम्यात्प्रतिभाति । तदुक्तं पुनरत्रानुवदामः 'शकनामा कश्चन भूपतिः सिंधुसागरमध्यवर्तिनो देशानशात् । तद्राज्यमध्यवर्तीनि **आर्य्यावर्त**देशे निवासस्तस्याभूत् । भारतवर्षीयास्तं शाक्येतरजातीयमाहुः । केचित्तु तं शूद्रजातीयं **मन्सुरा**ग्रामनिवासिनञ्च ब्रुवन्ति । पूर्वदेशीयानां साहाय्यावाप्तिपर्य्यंतं दुःशासनात्तस्य प्रजाः खलु महतीं पीडामन्वभूवन् । विक्रमादित्यस्तमभिगम्य तस्य सेनामदिद्रवत् **लुनी**दुर्ग**मुलतान**योर्मध्यस्थिते **कोरूर**देशभागेच तं न्यवधीत्" । युद्धञ्चेदं ५४४ तमे खिस्ताब्देऽभूदिति सर्वैरंगीकृतमेवास्ति । एवञ्च चतुश्चत्वारिंशदधिकशततमे खिस्ताब्दे निहतं यवनभूपतिमुद्दिश्य पद्यं निर्मिमाणो भर्तृहरिरुक्तसिद्धान्तानुसारेण ततोऽनन्तरमेवाभूदिति प्रतीयते । किञ्च **चीन**-

Digitized by Google

देशीयेन केनचित् (I-tsaug) **त्सांग** नामकेन तदानींतनेन यात्रोद्देशेन भारतवर्षमागतेन पञ्चाशदुत्तरषट्शततमेन्दे भर्तृहरिर्मृत इत्युक्तम् । तच्च भट्टमोक्षमुल्लूरैरंगीकृतम् । वयमपि तदेवांगीकृत्य भर्तृहरेः खिस्ताब्दसप्तम-शतकपूर्वार्धकालिकत्वं निश्चिनुमहे ।

अथेदानीमत्र शतककर्तुर्भर्तृहरेर्वाक्यपदीयप्रणेतुर्भर्तृहरेश्च संबंधं निर्णयिष्यामः । तयोरभेदं प्रतिपादयद्भिः काशीनाथमिश्रैरन्यैश्चापि सुधीभिः स्वमतोपोद्बलकप्रमाणान्यनुपन्यस्याद्भिरन्येषां तत्परीक्षणावसर एव न प्रदत्तः । विनायासेनात्मकार्यं साधयित्वा प्रत्याचिख्यासुपरिपन्थिशिरसि प्रमाणगुरुभारन्यासकौशलं तेषां प्रशंसामहे । वयं तु शतकचतुष्टयवाक्यपदीययोः समाननिर्मातृकत्वं नानुमन्यामहे । महान् खलु वैय्याकरणो महाभाष्यं विवृण्मतो वाक्यपदीयस्य निर्माता भर्तृहरिः । न खल्वेतानि शतकानि तादृशस्य भाष्यानुसारिणो महावैय्याकरणस्य वाचो भवितुमर्हन्ति । नहि केवलमेतेषु तादृशवैय्याकरणकर्तृकत्वबोधकं किञ्चिन्न लभ्यते प्रत्युतापाणिनीया अपि केचन प्रयोगास्तत्र दृश्यन्ते । नीतिशतकस्यैकाशीतितमे " क्वचिद्भूमौ शायीक्वचिदपि च पर्य्यंकशयनः " इति पद्ये ' भूमौ शायी ' इत्यपाणिनीयं प्रतिभाति । अत्र निणिविधायकसूत्रान्तराभावात् । बहुलग्रहणात्सप्तम्यलुकि भूमावित्यस्योपपदत्वेऽपि क्वचित्पदेन लिंगेन ताच्छील्याभावात् " सुप्यजाता " वितिं निणिर्न भवति । नापि " नन्दिग्रहिपचादिभ्योल्युणिन्यच " इति । ग्रह्यादित्वाभावादिति बोध्यम् । तथा च ' शाल्यन्नं सघृतं पयोदधियुतं भुञ्जन्ति ये मानवाः ' इति शृंगारशतकस्य पञ्चाधिकनवतितमे पद्ये भुञ्जन्तीति प्रयोगोऽसाधुः । ' भुजोऽनवने ' इति शास्त्रेणानवनार्थकाद्भुजेरात्मनेपदविधानात् । किञ्चवैराग्यशतकेऽपि त्र्यधिकनवतितमे ' दुःखान्मोक्ष्ये कदाहं तव चरणरतो ध्यानमार्गैकप्रज्ञः ' इति पद्ये ककारस्य संयोगपूर्वत्वाल्लघुत्वमपाणिनीयम् । विज्ञानशतकेऽप्यस्मिन् ' अहोऽत्यर्थे ' इत्यत्र संधिरसाधुः । ' ओत् ' इति तन्निषेधात् । एवञ्चास्य शतककर्तुर्वाक्यपदीयकर्तृकत्वं न मनागप्यनुमोदामहे ।

अथैवमत्र ग्रन्थेऽस्माकल्पज्ञत्वादक्षरयोजकदोषादस्मद्दृष्टिदोषाद्वा बहवो दोषा भवेयुस्तान् क्षन्तुमर्हन्ति सन्तः । तथा चास्य ग्रन्थस्य संशोधनादिविषये यैर्महात्मभिरस्मत्साहाय्यं विरचितं तान्सत्पुरुषांस्तदितरांश्च यैर्विघ्ना

Digitized by Google

एव विरचितास्तान् 'ये तु घ्नन्ति निरर्थकं परहितं ते केन जानीमहे'। इत्येनेन भर्तृहरिणा वर्णितानगम्यमहिम्नः पुरुषान्निरन्तरमानताः स्म इति शम्।

नागपुरम्
कार्तिक शु० ७.

घुले उपनामकः कृष्णशर्मा।



Digitized by Google

INTRODUCTION.

The general reader of Sanskrit is at once struck with the well-marked and distinct effect produced on him by the terse and epigrammatic style of Bhartrihari. This unusual yet most effective mode of expression,— expressions coming as they were from the inmost nature of man, quite naturally found a fervent and successful reception. The new reflective direction given to the Indian Muse by Bhartihari established his reputation as one of the Great Masters. He places before us in pithy language the aspirations of Youth, Manhood and Old age and the measure of how far they are fulfilled; the insignificance and nothingness of human affairs, and the sequal thereto consisting in the retirement into sweet solitude for silent, undisturbed, and divine contemplation.* This peculiar character gives his works a conspicuous place in the Sanskrit *Belles Lettres.*

* Accurately does Prof. Lassen estimate him when he says—"On account of the perfect art with which they are composed, these short poems are worthy of being ranked among the master pieces of Indian genius. Some of them are connected in sense as the description of the seasons, others form a whole by themselves, and may most fitly be compared to miniature paintings as presenting to us a complete picture in the narrow frame of one strophe." *Indische Alterthumskunde*- Vol. ii, P. 1174.

Digitized by Google

The prevailing moral tendency of his ideas, and the lucidity and simplicity of his diction, brought about by a choice selection of words and a more sparing use of the more gaudy and florid in poetry is the chief if not the only cause of his productions causing peculiar sensetions and establishing undeliable influence on the minds of natives and foreigners alike.

This mode of expression created for him a host of admirers and imitators. Many a *Śataka* that is still extant in the Sanskrit literature owes its origin to Bharrihari. The modern votary prizes it as a treasure which he deposits in his memory, and many a flashes of poetic expression of his can be traced to an idea from the Śatakas. The undiminished popularity of his works has led Sanskrit scholars to investigate into his works and dispel the mists of antiquity and folk-lore that surrounded and still surround his personality. The present work which is attributed to him will probably serve them as a help and guide.

Thomas Colebrooke, speaking about Bhartrihari in the 2nd volume of his Miscellaneous Essays says, " A beautiful poem has been composed in his name, containing moral reflections which the poet supposes him to make on the discovery of his wife's infidelity. It consists of either *three or four Śatakas* or centuries of couplets*

This and the last stanza of the present †work in which the author (Bhartrihari) hopes ' that his Vairâgya Śataka alone would invoke thoughts about the disgust of

*Madras reprint Vol. ii. P. 6.

†Vide St. CIII.

Digitized by Google

the world in the hearts of the worldly men (गृहस्थ); and that his lucid Śataka-traya would gratify the purified Hearts', have led us to believe the present work to be Bhartrihari's. The Manuscript ends in "इति श्रीभर्तृहरिविरचितं विज्ञानशतकं चतुर्थम्."

This is the outward aspect of the work. In order to prove the present work to be his, we shall have to consider the internal as well as the external evidences relating to it, which may be brought before our notice. As the book is undoubtedly old, traditional stories would lose the greater bulk in sifting them as reliable evidences. Let us now turn towards any internal evidence that may be found out.

The poetry of *Vidnyâna Śataka* is as smooth and flowing as that of *Nîti Śataka* or *Vairâgya Śataka*. The verse too is as melodious, harmonious, and regular as that of any other Śataka. The choice of metres too in all the Śatakas is of the same character. Moreover the style of the present Śataka is as simple, lucid, natural, and expressive as that of *Vairagya Śataka* or *Nîti Śataka*. A close comparison of the present Śataka with the other three will show such a similarity in diction and ideas as to confirm the opinion of the reader as to the possibility of the Śataka being Bhartrihari's.

The careful reader of the first three Satakas might have observed the underlying current of a settled style of composition uniformly conspicuous therein, and which every author generally possesses. The spontaneous outpourings of an impassioned heart would be frequently yet unconscientiously repeated many times in his several writings; and that is quite natural. Accordingly there

Digitized by Google

are so many anologies—identities of expression scattered everywhere in the style and tone of the four Śatakas that it is impossible to explain them otherwise than that they belong to the same author. However, the mere occurrence of the same expressions and ideas in different works would not necessarily lead one to conjecture the identity of the author, but it is the repetition of those analogous expressions and thoughts with the peculiarly characteristic frequency tracable in each of the compositions of Bhartrihari that carries considerable weight in determining the identity of their author. The following anologies are some of those which struck us as prominent and convincing.

As regards diction the following are worthy of consideration—:

विज्ञानशतके	
'कदन्नेन' St. XVIII.	'कदशनमथवा' वैराग्य० ७४
'कंदाम्बुपर्णाशिनाम्' St. LI.	'वाताम्बुपर्णाशनाः' शृंगार० ९९
'विश्वजनीनम्' St. LIV.	'आत्मनीनम्' वैराग्य० ७७
'विरति विरसा' St. LIX.	'विरति वनिता' वैराग्य० ७९
'ध्यानस्यचोच्छित्तये' St, CII.	'संसारविच्छित्तये' वै० ११
'क्षुत्क्षामकंठाःस्त्रियो' St. XCV.	'क्षुधाक्षामः' वैराग्य० १८
'अजरममरं चिन्तय मनः' St. XV.	'तस्मात् अनंतमजरं....तद्ब्रह्म चिन्तय' वैराग्य० ७६

And here are some of the anologies in thoughts—:

'कदाभागीरथ्या' St. 22.	'कदावाराणस्याम्' वैराग्य० (Misc) १०
'नाभ्यस्तो धातुवादो' 47.	'नाभ्यस्ता भुवि' वैराग्य० ८९ 'न नटा न विटा' २७
'तां काशीं नो भजन्ते'—38.	'तां काशीं परिहृत्य' वैराग्य० ९६
'जरया जीर्णीकृतायां तनौ' 94.	'जराजीर्णैरंगैः' नीति० ११२

Digitized by Google

'सहनीय तेजः' 55.	'शान्ताय तजसे' वैराग्य० १
'यद्येता' &c. 56.	'कः कुर्वीत शिरःप्रणाममलिनं' शृंगार० ११
'आढ्यःकश्चिद्पंडितोऽपि' 82.	'यस्यास्ति वित्तं' नीति० ४१

These and such other points of semblance will strike any careful reader. Such points of similarity in tone and style cannot be found in works of any two authors unless one designedly imitates the style, diction, and thoughts of another in all its minute details and colours. If विज्ञानशतक be the production of such an imitator which, we at least, cannot reconcile ourselves to believe–, if he has copied all the microscopic details—details in style, ideas, and taste, if he has copied all these, it would be an unparalleled and most singular example in the literary history of the world— an example of thorough imitation—unprecedented in the wide range of Sanskrit Book-Lore.

In stanza LVII of the text, our author refers to a certain बाला whom we take to be his wife, who tries to persuade him to return home, him whose mind was irresistably attracted towards the mystic deeds of Shri Krishna. Here our poet most probably refers to his wife* who tried to dissuade him from abdicating the throne and renouncing the wordly pleasures for गंगातीरवास. Similarly in Stanza CI he bids farewell to his son, directing him to return home with his mother, and lastly wishes them a *happy* journey. These Stanzas shade a faint light on the annecdote that Bhartrihari discarded the regal robes for residence in Benares in spite of the repeated entreaties of his wife and son who had sped there to bring him back. This

* अनंगसेना; but हरिहरोपाध्याय has it भानुमती.

Digitized by Google

pathetic scene of the voluntery renunciation of the kingly dignity and the determined attitude of defiance to any temptations is depicted by हरिहरोपाध्याय in his drama called 'भर्तृहरिनिर्वेद'* where, Bhartrihari is made to tell his son that it was impossible for him to return, as he was as it were pitilessly dragged by विज्ञान towards परब्रह्म.† This shows that हरिहरोपाध्याय was sufficiently acquainted with this story of भर्तृहरि to insert it in his drama.

His disregard for the softer sex which has been conspicuously marked in the first three Śatakas occurs in this Śataka also. Similarly his great love for residence at Benares, his great reverence for Siva, Ganges, Bramha and Âtmadnyân has been marked in the present Śataka also. These, and similar other identities have led us to consider this work as a production of the famous शतककार Bhartrihari.

Now rises the next question– "When did Bhartrihari live?"

In stanza LXV of this work our author says that there was no secure place left for a man of contemplative nature, as both the banks of Ganges were infected by म्लेच्छ. In the next stanza (St. 66) he says that the country was tainted by the tramp of म्लेच्छ armies consisting of chariots, elephants, and the foot. Similarly in stanza LXVII he bemoans the degraded state of Society where Vedas were not respected, grammer and logic neglected and the country ruled despotically by a Mlechha King. Now the question that naturally strikes one after the perusal of these stsnzas is, to whom does Bhartrihari

---

* Kâvya Mâlâ Series. No. XXIX

† 'विज्ञानेन विकृष्य निष्ठुरतरं नीये परब्रह्मणि' भर्तृहरिनिर्वेदः v. 25.

Digitized by Google

refer by the epithet Mlechhas ? We hazard to offer a conjecture: can it not refer to the reign of Saka? Albiruni writes thus of Prince Saka—:" Saka is the name of a prince who reigned over the countries situated between the Indus and the Sea.* His residence was in the centre of the Empire in the country named Arya Varta. .....The people had much to suffer from his despotism until they received aid from the East. Vikramaditya marched against him, put his army to flight, and killed him in the territory of Korur, situated between Multan and the Castle of Luni."† The battle of Korur is said to have been fought in A. D. 544. This reference of Bhartrihari to the religious laxity of his time, and to the despotic rule of foreigners does not occur in this book only, but in वैराग्यशतक also.‡ No doubt the Mlechhas were crushed by Vikramaditya, but not the whole lot of them, only the powerful majority. Moreover Bhartrihari does not profess to be writing *up to date*, but gives an *ideal* Sketch of the then prevailant state of society and country *in general*, and chooses for the purposes of delineation to throw himself back to an eventful period anterior to the one at which he was writing the present Śataka. And moreover Śaka, the most powerful of the Hun tribes was crushed; the minor powers might have submited to Vikramaditya. These referances place our auther about the time of Vikramaditya Harsha of Ujjayin.

---

* Vide Bhau Dajee, J. R. A. S. B. R. Vol. viii, P. 242, 1864; Reinaud, *Mémoire sur l' Inde, 1849, P. 79.*

† Max Muller: India, what can it teach us. P. 282.

‡ Vide वैराग्य श० St. XXVIII.

Digitized by Google

Mr. Telang, in his introduction to No. XI of the Bombay Sanskrit Series remarks that Bhartrihari savours of Vedântism; and as Ŝanker was the best, and not the first expositor of Vedânta, and as there was the Aupanishadin sect existant even prior to Ŝanker, the learned Editor prefers to place Bhartrihari as one of the Aupanishadins for convenience sake. Here, however, we beg to differ from Mr. Telang. If this Ŝataka be Bhartrihari's —and we implicitly believe it to be his, there occur in this work some peculiar terms of the Vedântic Philosophy, –terms which belong to the Ŝánkar Philosophy specially and not to any prior sectarian phraseology.

In Stanza LXIV our poet uses the word प्रत्यगात्मन्. Now this word occurs nowhere to our knowledge in any other ancient work than काठोपनिषद् and therein too, but once. This word is fully explained by Ŝanker in his Bhâshya on काठोपनिषद्* and he uses this term frequently in almost all other Bhâshyas. The use of this particular word by Bhartrihari shows his thorough acquaintance with Ŝânkerâchâryan Philosophy, and we venture to say that the philosophy preached by the Ŝataka-kâr Bhartrihari is not the anticipation but the exposition of the Ŝankerâchâryan doctrines.

Similarly Stanza XXIV preaches the doctrine of Ŝanker that the अधिष्ठान of भ्रान्ति rests in परब्रह्म and the knowledge of the अधिष्ठान *i. e.* परब्रह्म is acquired as soon as the illusion is dispelled. That there were no intermediate steps between the dispelling of भ्रान्ति and the knowledge of *Brahma* was a point of discussion at Ŝanker's time, brought about by the Vârtikakârs. They

* *Vide* काठो॰ 4. 1.

Digitized by Google

held out that there *were* some intermediate steps, but Ŝanker convinced them that it was otherwise.

Similar other instances may be pointed out to support our theory that Bhartrihari flourished after Ŝanker. But the best thing will be to place before our readers the concentrated philosophy of Ŝanker, so that they may judge for themselves how far it is reflected in the Ŝatakas of Bhartrihari.

Ŝanker preached the doctrine that there was nothing real but ब्रह्म. All else is the work of माया. What we call 'प्रपंच' is not existent at all. It is all illusion. "मायामात्रमिदं द्वैतं अद्वैतं परमार्थतः". All that we see, the material world and its concerns—is illusion. A rope in the dark is mistaken for a serpent; but for all that, it is nothing but a piece of string. That we mistook it for a snake was the work of illusion. Similarly we are but शुद्धबुद्ध in this diverse world. It is through illusion that we consider ourselves happy, or unhappy. It is through the same agent that we recognize a distinction between this and that, friend and foe. In truth, we are pure, emancipated from the worldly existance, and full of bliss. There is no distinction in the Kingdom of God. It is all *Brahma*.

But to accomplish this, the Adwaitwâdins do not direct us with any particular instructions. The only generalized remark that they offer is to renounce all the corporal pleasures of life, to cultivate self-control, and to study and contemplate over such works as Bramha-Sutra in order to have मोक्ष, and be identified with *Brahma*.

The *Advaita* of Ŝanker differs from that of Ŝrutee. *Ŝân-*

Digitized by Google

ker Advaita states that the wrong notion caused by माया or the *principium individuationis* is akin to the wrong notion caused by the sight of गंधर्वनगरी or *Fata Morgana*. The world is a delusion; that which is real is ब्रह्म and ब्रह्म only. To show the one-ness of जीवात्मा and परमात्मा or Individual soul and the Supreme Spirit, Ŝrutee gives the similitude of clay and things made of clay; while Ŝankarâchârya gives the example of रज्जुसर्प. This connection between ब्रह्म and the world as explained by Ŝrutee under the similitude of मृण्मय things is known as विवर्तवाद. As an eddy produced in water is not different from the water of the river or lake in which it takes place, so also there is *Brahma* in all the objects of the world. The latter is called परिणामवाद.

This abstract will be an aid to our readers in understanding the philosophical doctrines inculcated in the following pages.

Historical allusions about Mlechha kings have led us to believe that Bhartrihari flourished in the reign of Silâditya II (A. D. 610–650), which opinion is supported by the remark of Itsang* that Bhartrihari died in A. D. 650. Again Ŝankerâchârya is said to have flourished in the latter half of the Sixth century.† But we believe him even prior to this. Had it been otherwise, Bhartrihari would certainly have mentioned him in his works. But as we have not got any proofs to support our opinion,

---

* Vide: Max Muller; India, what can it teach us. P. 348.

† *Mudra-Rakshasa*, Bombay Sanskrit Series, XXVII, Introduction—P. 52.

Digitized by Google

we may well accept Telang's opinion as it would not hinder our present purpose.

The question whether it was Bhartrihari himself who wrote the Śataka, or some poet at his court composed the poem and dedicated it to the public in his master's name, —a question raised by Colebrooke is discussed at length by Mr. Telang, and hence it need not be discussed here. However we may be allowed to hint that it was not rare of yore for श्री and सरस्वती to co-operate; and as conspicuous examples we may mention the names of *Rajshekhar*, *Bhoja*, *Śudraka* and James the First of Scotland whose 'King's Quair,' is still held a standard work of great repute.

We cannot similarly believe the Bhartrihari of वाक्यपदीय and भट्टिकाव्य the same as the auther of the Śatakas. If credit be given to the story that Bhartrihari was the brother of Vikramâditya, it is quite clear that he should have flourished contemporaneously with Kâlidâs. And at the time of Kâlidâs the grammatical appliances (प्रयोग) were long settled to require a कैयट to fix them. Hence instead of supposing the reference of कैयट to हरि† as belonging to Bhartrihari we think the Śataka-kâr Bhartrihari quite distinct a personage from the Grammarian हरि.‡ Even taking as granted for a while that both the personages were one, it is impossible for such eminent a Grammarian as वाक्यपदीयकार to make such gross mistakes

† He thus refers to हरि in his भाष्यप्रदीपः— "तथापि हरिवृद्धेन सारेण ग्रंथसेतुना। क्रममाणः शनैः पारं तस्य प्राप्तास्मि पंगुवत्॥"

‡ *Vide.* निबंधमाला; No. XXVIII.

Digitized by Google

of grammar as would not be pardoned for a school-boy even.*

---

* We give reference to the following few:—

'दुःखान्मोक्ष्ये कदाहं तव चरणरतो ध्यानमार्गैकप्रज्ञः '--- वैराग्यश० १३
(सिद्धान्तकौमुदी ' संयोगे गुरु ')

' क्वचित् भूमौशायी क्वचिदपि च पर्यंकशयनः , नीतिश० ८१.
(सिद्धान्तकौमुदी, ' सुप्यजातौ णिनिस्ताच्छील्ये ')


' शाल्यन्नं सघृतं पयोदधियुतं भुञ्जन्ति ये मानवाः ' शृंगारश० ९५.
[सिद्धान्तकौमुदी, ' भुजोऽनवने ' आत्मनेपदम्]

See also Sanskrit Introduction,—P. 13.

Digitized by Google

भर्तृहरिविरचितं

विज्ञानशतकम्.



राजकविमुकुटमण्डनो भर्तृहरिर्नीतिशृंगारवैराग्यात्मकं शतकत्रयं निर्माय वैराग्यानन्तरमनायासेन साध्यं विज्ञानं श्लोकशतेन वर्णयिष्यन्प्रारिप्सितस्य ग्रन्थस्य निष्प्रत्यूहपरिसमाप्तिफलकं मंगलं मनसि विधाय शिष्यशिक्षायै ग्रन्थादौ तन्निबध्नाति विगलदिति:—

विगलदमलदानश्रेणिसौरभ्यलोभो-
पगतमधुपमालाव्याकुलाकाशदेशः ।
अवतु जगदशेषं शश्वदुग्रात्मदर्प्यो
विपुलपरिघदन्तोद्दण्डशुण्डो गणेशः ॥ १ ॥

विगलन्तीनां स्रवंन्तीनामलदानश्रेणीनां निर्मलमदवारिधाराणां सौरभ्यलोभेनोपगताभिः सम्प्राप्ताभिर्भ्रमरपाङ्क्तिभिर्व्याकुलो व्याकुलीकृत आकाशदेशो येन तादृशो, विपुलौ परिघाकारौ च दन्तौ यस्य स चासावुद्दण्डा महती शुण्डा यस्य स गणेशोऽशेषं निखिलं जगच्छश्वन्निरन्तरमवतु रक्षतु मायाजालादिति शेषः। पद्येऽस्मिन्नुग्रात्मदर्प्य इति पदं दुर्बोधमिति यथादृष्टमस्माभिरत्र निवेशितम्। मालिनीवृत्तम् । "ननमयययुतेयं मालिनी भोगिलोकै" रिति तल्लक्षणात् ॥ १ ॥

यत्सत्तया शुचि विभाति यदात्मभासा
प्रद्योतितं जगदशेषमपास्तदोषम् ।
तद्ब्रह्म निष्कलमसंगमपारसौख्यं
प्रत्यग्भजे परममंगलमद्वितीयम् ॥ २ ॥

यत्सत्तयेति— यस्य ब्रह्मणः सत्तया विद्यमानत्वेन जगच्छुचि शुद्धं विभाति, यस्यात्मभासा दीप्त्या अपास्तदोषं दोषरहितमशेषं जगत्प्रद्योतितम्। यथा शुक्ताविदं रजतमिति व्यवहारे शुक्तिसत्ताधीनसत्ताकं रजतं तथैव ब्रह्मसत्ताधीनसत्ताकमेतदशेषं जगत् । यथा वा शुक्तिरेव रजतरूपेणावभासते तथा ब्रह्मैव जगद्रूपेणावभासते । न हि ब्रह्मणो भिन्नं जगत् ब्रह्मैव तदिति

Digitized by Google

भावः । तथा च श्रुतिः 'तस्य भासा सर्वमिदं विभाति' इति । तन्निर्गुण परममंगलमतिकल्याणकरमद्वतीयं 'एकमेवाद्वितीयं ब्रम्ह' इति श्रुतेः । निष्कलं निरवयवमपारममर्यादं सौख्यं यस्मिन् तादृशं प्रत्यक् ब्रम्ह भजे । वसंततिलका वृत्तम् । 'उक्ता वसंततिलका तभजा जगौ गः' इति तल्लक्षणात् । इतः परं सप्त श्लोका वसन्ततिलकावृत्तेनैवोपनिबद्धाः ॥२॥

माता मृता जनयितापि जगाम शीघ्रं
लोकान्तरं तव कलत्रसुतादयोऽपि ।
भ्रातस्तथापि न जहासि मृषाभिमानं
दुःखात्मके वपुषि मूत्रकुदर्पकूपे ॥ ३ ॥

मातेति—हे भ्रातः तव माता मृता जनयिता पिताऽपि शीघ्रं लोकान्तरं जगाम मृत इत्यर्थः । कलत्रसुतादयो भार्यापुत्रादयोऽपि लोकान्तरं जग्मुरिति शेषः । तथापि मूत्रकुदर्पयोः कूपे दुःखात्मके दुःखबहुले वपुषि मृषा व्यर्थमभिमानं न जहासि न त्यजसि । अभिमानहेत्वभावेऽपि नश्वरे देहे वृथाभिमानं वहसीति महदाश्चर्यमिति भावः । 'मूत्रपुरीषकूपे' इति पाठः साधीयान् भवेत् । लिखितपुस्तके तु 'मूत्रकदर्पकूपे' इत्येवमुपलभ्यते ॥ ३ ॥

ब्रह्मामृतं भज सदा सहजप्रकाशं
सर्वान्तरं निरवधि प्रथितप्रभावम् ।
यद्यस्ति ते जिगमिषा सहसा भवाब्धेः
पारे परे परमशर्मणि निष्कलंके ॥ ४ ॥

ब्रह्मेति—यदि हे भ्रातरिति योज्यम् । ते तव परमं शर्म सुखं यत्र तादृशे निष्कलंके निर्मले भवाब्धेः संसारसागरस्य परे पारे जिगमिषा गन्तुमिच्छास्ति तर्हि प्रथितप्रभावं श्रुत्यादिषु प्रथितः प्रसिद्धः प्रभावः सामर्थ्यं यस्य तन्निरवधि मर्यादारहितमनन्तमित्यर्थः सर्वान्तरं विश्वव्यापि सहजप्रकाशं स्वप्रकाशं " न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं यस्य भासा सर्वमिदं विभाती " ति श्रुतेर्ब्रह्मण एव केवलं स्वप्रकाशत्वात् । ब्रह्मरूपममृतं सदा निरन्तरं भज सेवस्व । ब्रह्मज्ञानेनैव मोक्षमधिगमिष्यसीति भावः ॥ ४ ॥

आरभ्य गर्भवसतिं मरणावसानं
यद्यस्ति जीवितुमदृष्टमनेककालम् ।

Digitized by Google

जन्तोस्तथापि न सुखं सुखविभ्रमोऽयं
यद्बालया रतिरनेकविभूतिभाजः ॥ ५ ॥

आरभ्येति—गर्भवसतिमारभ्य मरणावसानं गर्भसंभवप्रभृति मरणपर्यन्तमित्यर्थः । यद्यनेककालं बहुकालं जीवितुमदृष्टं भाग्यमस्ति तथापि बालया युवत्या रतिरिति यत्तदनेकविभूतिभाजोऽनेकजन्माधीनस्य जन्तोः सुखं न किन्तु सुखविभ्रमः सुखभ्रान्तिरेव ॥ ५ ॥

सा रोगिणी यदि भवेदथवा विवर्णा
बालाप्रियाशशिमुखी रसिकस्य पुंसः ।
शल्यायते हृदि तथा मरणं कृशांग्या—
यत्तस्य सा विगतनिद्रसरोरुहाक्षी ॥ ६ ॥

सेति—सा बाला युवती शशिमुखी चंद्रवदनापि यदि रोगिणी रोगग्रस्ता अतएव विवर्णा निस्तेजा भवेत्तर्हि रसिकस्य कामिनः पुंसः पुरुषस्याप्रिया भवतीति शेषः । रसिकं न प्रीणातीत्यर्थः । तथाच आयत्तस्य तस्यामासक्तस्य पुरुषस्य हृदि चित्ते सा विगतनिद्रसरोरुहाक्षी फुल्लकमलनयनापि कृशांगी चेद्रोगादिना जाता आमरणं यावज्जीवं शल्यायते शाल्यवेदनां जनयति । रूपादिसौभाग्यवत्यपि कामिनी कामिनमनुरक्तं निरंतरं दुनोतीति बालारतिर्नैव सुखायेति भावः ॥ ६ ॥

त्वत्साक्षिकं सकलमेतदवोचमित्थं
भ्रातर्विचार्य भवता करणीयमिष्टम् ।
येनेदृशं न भविता भवतोऽपि कष्टं
शोकाकुलस्य भवसागरमग्नमूर्तेः ॥ ७ ॥

त्वदिति—हे भ्रातः सकलमेतज्जगत्त्वत्साक्षिकं त्वं साक्षी साक्षात् द्रष्टा यस्य तादृशं त्वं निर्विकार एवेत्यर्थः । इत्थमवोचम् । तद्विचार्य भवता त्वयेष्टमभिमतं करणीयं येनभवसागरे मग्ना मूर्तिः शरीरं यस्य तादृशस्य शोकाकुलस्यापि भवतस्त्वेदृशं कष्टं न भविता । निर्विकारमात्मानं जानीहीति भावः ॥ ७ ॥

निष्कंटकेऽपि न सुखं वसुधाधिपत्ये
कस्यापि राजतिलकस्य यदेष देवः ।
विश्वेश्वरो भुजगराजविभूतिभूषो
हित्वा तपस्यति चिरं सकला विभूतीः ॥ ८ ॥

Digitized by Google

निष्कण्टक इति—यद्यस्मान्निष्कण्टके शत्रुरहिते वसुधाधिपत्येऽपि एकातपत्रे जगतः प्रभुत्वे सत्यपि कस्यापि राजतिलकस्य भूपतिवरस्य सुखं न भवतीति शेषः। अत एवैष प्रसिद्धो विश्वेषामीश्वरः प्रभुर्देवः शंकरः सकला विभूतीः संपूर्णं छत्रचामरादैश्वर्यं हित्वा परित्यज्य भुजगराजः शेषः विभूतिर्भस्म चैव भूषा भूषणं यस्य तादृशः सन् चिरं तपस्यति तप आचरति। देवाधिदेवस्य शंकरस्यापीयं दशा का कथा पुनर्मानवानामिति भावः॥ ८॥

भूमण्डलं लयमुपैति भवत्यबाधं
लब्धात्मकं पुनरपि प्रलयं प्रयाति।
आवर्तते सकलमेतदनन्तवारं
ब्रह्मादिभिः सममहो न सुखं जनानाम्॥ ९॥

भूमण्डलमिति—भूमण्डलं लयं नाशमुपैति प्राप्नोति पुनरबाधं स्थितिमद्भवति लब्धात्मकं लब्धप्रतिष्ठाकं तत्पुनः प्रलयं प्रयाति। एवमेतज्जगद्ब्रह्मादिभिः समं सहानन्तवारं निरन्तरमावर्तते। तस्मादहो इति खेदे जनानां प्राणिनां न सुखं किन्तु सुखविभ्रमोयमिति भावः॥ ९॥

यदा देवादीनामपि भवति जन्मादि नियतं
महाहर्म्यस्थाने ललितललनालोलमनसाम्।
तदा कामार्तानां सुगतिरिह संसारजलधौ
निमग्नानामुच्चै रतिविषयशोकादिमकरे॥ १०॥

यदेति—यदा महति हर्म्यस्थाने प्रासादस्थले ललितासु मनोहरासु ललनासु नितंबिनीषु लोलं चञ्चलं मनो येषां तादृशानां देवानाममराणामपि नियतं निश्चयेन जन्मादि जन्मस्थितिभङ्गं भवति। तदेह जगति रतिश्च विषयश्च शोकश्चादयो येषान्त एव मकरा जलजन्तुविशेषा यस्मिन् तादृशे संसारजलधावुच्चैरतिगभीरं यथा स्यात्तथा निमग्नानां कामार्तानां विषयासक्तानां मर्त्यानां सुगतिरिति काकुः। देवादीनां यदीदृशी दुर्गतिस्तर्हि का वार्ता सुगतेर्मानवानामिति भावः। शिखरिणी वृत्तम्। 'रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी' इति तल्लक्षणात्। इतःपरं सप्तदश श्लोका अनेनैव छन्दसोपनिबद्धाः॥ १०॥

स्वयं भोक्ता दाता वसु भुवहु संपाद्य भविता
कुटुंबानां पोष्टा गुणनिधिरशेषाप्तसतनरः।

Digitized by Google

इति प्रत्याशस्य प्रबलदुरितानीतविधुरं
शिरस्यस्याकस्मात्पतति निधनं येन भवति ॥ ११ ॥

स्वयमिति—गुणनिधिः सकलगुणसंपन्नः स्वयं भोक्ता भोक्ष्यते लुडन्तमेतदेवमग्रेऽपि । दाता दास्यति सुबहु वसु धनं संपाद्य कुटुंबानां पोष्टा पालकः तृजन्तमेतद्भविता भविष्यतीत्येवं प्रत्याशस्य प्रति वस्तुनि विषय आशा यस्य तस्य, अशेषैः सर्वैर्जनैरीप्सितः सचासौ नापुरुषस्तस्य शिरसि प्रबलदुरितेनानीतं विधुरं दुःखमकस्मात्पतति येन निधनं मरणं भवति॥११॥

विपश्चिद्देहादौ क्वचिदपि ममत्वं न कुरुते
परब्रह्मध्याता गगननगराकारसदृशे ।
निरस्ताहंकारः श्रुतिजनितविश्वासमुषितो
निरातङ्कोऽव्यग्रः प्रकृतिमधुरालापचतुरः ॥ १२ ॥

विपश्चिदिति—विपश्चिद्विद्वान् ज्ञानसंपन्नोऽत एव प्रकृत्या स्वभावतो मधुरालापे चतुरः श्रुत्या जनितं विश्वासमुषित आश्रितो निरातङ्को निर्भयोऽव्यग्रोऽनन्यासक्तः परब्रह्मध्याता गगननगराकारसदृशे गंधर्वनगरवन्नश्वरे देहादौ विषये क्वचिदपि कदाचिदपि ममत्वं न कुरुते । मम देहो मम पुत्रो मम भार्येत्यादिकं ममभावं त्यजतीति भावः ॥ १२ ॥

अरे चेतश्चित्रं भ्रमसि यदपास्य प्रियतमं
मुकुंदं पार्श्वस्थं पितरमपि मान्यं सुमनसाम् ।
बहिः शब्दाद्यर्थे प्रकृतिचपले क्लेशबहुले
न ते संसारेऽस्मिन्भवति सुखदाद्यापि विरतिः ॥१३॥

अरे इति—अरे चेतः हे मनः पार्श्वस्थं समीपवर्तिनं पितरं सर्वप्राणिनां निर्मातारं पालकञ्च सुमनसां देवानामपि मान्यं पूज्यं प्रियतममतिशयेन प्रियम्, अस्ति भाति प्रियञ्चेति वस्त्वन्तरं सर्वं केवलं प्रियमेवायं त्वतिशयेन प्रिय इति तस्माद्विशेषः । एतादृशं मुकुंदं श्रीकृष्णमपास्य विहाय यद्भ्रमसि तच्चित्रं महदाश्चर्यम् । बहिः शब्दाद्यर्थे प्रकृतिचपले स्वभावचञ्चले क्लेशबहुलेऽस्मिन् संसारे ते तव सुखदा विरतिर्विरागोद्यापि न भवतीति चित्रम् ॥ १३ ॥

न जानीषे मूर्ख क्वचिदपि हितं लोकमहितं
भ्रमन्भोगाकांक्षाकलुषिततया मोहबहुले ।
जगत्यस्मिन्नारण्ये प्रतिपदमनेकापदि सदा

Digitized by Google

हरिध्याने व्यग्रं भव सकलतापैककदने ॥१४॥

नेति—हे मूर्ख चेतो विशेषणमेतत्। भोगाकाङ्क्षया इन्द्रियविषयोपभोगेच्छया या कलुषितता कालुष्यं तया हेतोर्मोहबहुले मोहमये प्रतिपदं निरन्तरमनेका आपदो यस्मिन् तादृशेऽत्रारण्ये जगति भ्रमल्लोकैः सद्भिर्महितं पूजितं हितं कल्याणं क्वचिदपि न जानीषे। कुत्र तत्किञ्च तर्हि क्रियतामित्याह सदेति। सकलतापैककदने सकलदुःखनाशने हरिध्याने व्यग्रमासक्तं भव। तत्रैव ते हितमिति भावः ॥१४॥

वियद्भूतं भूतं यदवनलभं चाखिलमिदं
महामायासंगाद्भुजग इव रज्वां भ्रमकरम्।
तदत्यन्ताह्लादं विजरममरं चिन्तय मनः
परब्रह्माख्यग्रं हरिहरसुराद्यैरवगतम् ॥ १५ ॥

वियदिति—हे मनः अखिलं संपूर्णमिदं भूतं सिद्धं वियद्भूतमाकाशभूतं महामायायाः संगाद्रज्वां भुजग इव भ्रमकरमस्तीति शेषः। रज्जौ सर्प इव ब्रह्मणि जगदिदं भ्रान्तिरेवेति भावः। किन्तर्हि क्रियतामित्याह तदिति-तत्तस्मात्कारणादव्यग्रमनन्यासक्तं सदत्यन्त आह्लादो यत्र तत्परब्रह्म चिन्तय। प्रश्नचिन्हांकितं पदं दुर्बोधमशुद्धञ्च। मूलपुस्तके तु 'यदवनलभं, इत्येवं दृश्यते तच्छन्दःसौकर्यार्थं 'यदवनलभं' इति कल्पितमस्माभिर्नतु कस्मैचिदर्थबोधनायेति बोध्यम्। अन्यत्स्पष्टम् ॥ १५ ॥

न चेत्ते सामर्थ्यं भवनमरणातङ्कहरणे
मनोऽनिर्दिष्टेऽस्मिन्नवगतगुणे ज्ञातुमकले।
तदा मेघश्यामं कमलदलदीर्घाक्षममलं
भजस्व श्रीरंगं शरदमृतधामाधिकमुखम् ॥ १६ ॥

न चेदिति—हे मनः भवनमरणातङ्कहरणे जन्ममरणभयहारकेऽकले निरवयवेऽनिर्दिष्टे निर्देशमतिक्रान्तेऽवगतगुणे निर्गुणेऽस्मिन्परमात्मनि विषये ज्ञातुं ते तव सामर्थ्यं चेन्न तदा शरदि ऋतौ अमृतधामा चन्द्रस्ततोऽधिकं सुंदरं मुखं यस्य तादृशं रज्यतेऽस्मिन्निति रंगः श्रियोरंगस्तं श्रीकृष्णं भजस्व। शेषं स्पष्टम्। निर्गुणस्य ब्रह्मणश्चिन्तनेऽशक्तश्चेत्सगुणं ब्रह्म श्रीकृष्णमाश्रयस्वेति भावः ॥ १६ ॥

कथातः कायातो द्विज कलयसे रत्नमटवी-
मटन्व्याघ्राघ्रातो मरणमगमद्विश्वमहितः ॥

Digitized by Google

अयं विद्यारामो मुनिरहह केनापि विदुषा
न स्वल्वात्मप्रायो भवतु सुकरो ज्ञातुमशिवः ॥ १७ ॥

केति—दुर्बोध मिदं पद्यम् ।

अहं श्रान्तोऽध्वानं बहुविषममतिक्रम्य विषमं
धनाकांक्षाक्षिप्तः कुनृपतिमुखालोकनपरः ।
इदानीं केनापि स्थितिमुदरकूपस्य भरणे
कदन्नेनारण्ये क्वचिदपि समीहे स्थिरमतिः ॥ १८ ॥

अहमिति—धनस्याकांक्षा लाभेच्छा तया क्षितो भ्रान्तः कुत्सितानां भूमीपालानां नृपाणां मुखावलोकनमेव परं यस्य तादृशः सन् बहुविधं विषमं कुटिलं कण्टकाकीर्णञ्चाध्वानं मार्गमतिक्रम्याहं श्रान्तोऽस्मि । अत इदानीं स्थिरामतिर्यस्य तादृशोऽहं क्वचिदप्यरण्ये केनाऽपि कदन्नेन कुत्सितान्नेन उदरमेव कूपस्तस्य भरणे स्थितिं स्थानं समीहे प्राप्तुमिच्छामि॥१८॥

यमाराध्याराध्यं त्रिभुवनगुरोरास्पदवसतिः
ध्रुवो ज्योतिश्चक्रे सुचिरमनवद्यं शिशुरपि ।
अवाप प्रल्हादः परमपदमाराध्य यमितः
स कस्यालं क्लेशो हरति न हरिः कीर्तितगुणः ॥ १९ ॥

यमिति—शिशुरपि बालोऽपि ध्रुव उत्तानपादनृपसुत आराध्यमाराधनार्हं यमाराध्य त्रिभुवनस्य गुरोराचार्यस्यास्पदा प्राप्ता वसतिः स्थानं पीठं वा येन तादृशः सन् सुचिरमविनाश्यनवद्यं निर्दोषं ज्योतिः कीर्तिरूपं चक्रे । यञ्चाराध्य प्राल्हादो हिरण्यकशिपुपुत्र इतः परममुत्कृष्टं पदमवाप । स हरिः कीर्तिता गुणा यस्य तादृशः संस्तुतो ध्यातो वा सन् कस्य प्राणिनः क्लेशं संसारदुःखमूलं पर्याप्तं न हरति । अपि तु सर्वेषामेव भजतां दुःखमपहरतीति भावः ॥ १९ ॥

कदाचित्कष्टेन द्रविणमधमाराधनवशा-
न्मया लब्धं स्तोकं निहितमवनौ तस्करभयात् ।
ततो नित्ये कश्चित्कचिदपि तदाखुर्बिलगृहेऽ-
नयल्लब्धोऽप्यर्थो न भवति यदा कर्म विषमम् ॥२०॥

कदादिति—मया कदाचिदधमानां नीचानां कृपणानां वाऽऽराधनवशात्कष्टेन स्तोकं किञ्चिद्धनं लब्धं तत्तस्करभयात् चोरभयादवनौ पृथिव्यां निहितं निभृतं स्थापितम् । ततस्तस्मात्स्थानादवनिगर्भादित्यर्थः क्वचिन्

Digitized by Google

प्रतिदिनं कश्चिदाखुर्मूषकः क्वचिदपि बिलगृहेऽनयत् । तत्किमित्याशंक्यार्थान्तरं न्यस्यति । यदा कर्म दैवं विषमं प्रतिकूलं भवति तदा लब्धोऽप्यर्थो धनं न भवति नश्यति ॥ २० ॥

जगाम व्यर्थं मे बहुदिनमथार्थार्थिततया
कुभूमीपालानां निकटगतिदोषाकुलमतेः ।
हरिध्यानव्यग्रं भवितुमधुना वाञ्छति मनः
क्वचिद्गंगातीरे तरुणतुलसीसौरभभरे ॥ २१ ॥

जगामेति—अथ चार्थानामर्थिततया याचकत्वेन कुत्सितानां भूमीपालानां नृपाणां निकटगतेः समीपगमनाद्धेतोर्दोषाकुला मतिर्यस्य तादृशस्य मे बहुदिनं व्यर्थं जगाम । अत अधुना मम मनस्तरुणतुलसीनां सौरभभरो यत्र तादृशे गंगातीरे क्वचिद्धरिध्याने व्यग्रमासक्तं भवितुं वाञ्छति । अत्र 'अर्थिततया' इति प्रयोगश्चिन्त्यः ॥ २१ ॥

कदा भागीरथ्या भवजलधिसंतारतरणेः
स्खलद्वीचीमालाचपलतलविस्तारितमुदः ।
तमस्स्थाने कुञ्जे क्वचिदपि निविश्याहृतमना
भविष्याम्येकाकी नरकमथने ध्यानरसिकः ॥ २२ ॥

कदेति—स्खलन्तीनां वीचीमालानां तरंगलेखानां चपलतलेन विस्तारिता मुद् आनन्दो यया तस्याः, भवजलधेः संसारसागरात्संतारे संतारविषये तरणेर्नौकाभूताया भागीरथ्यास्तीरे क्वचिदपि तमःस्थाने तमोव्याप्तं स्थानं यत्र तादृशे कुञ्ज एकाकी निविश्याहृतं विषयेभ्य आकृष्टं मनो यस्य तथाभूतः सन्नरकमथने श्रीकृष्णे ध्यानरसिकः कदाभविष्यामि ॥ २२ ॥

कदा गोविन्देति प्रतिदिवसमुल्लासमिलिताः
सुधाधाराप्राया त्रिदशतटिनीवीचिमुखरे ।
भविष्यन्त्येकान्ते क्वचिदपि निकुञ्जे मम गिरो
मरालीचक्राणां स्थितिसुखरवाक्रान्तपुलिने ॥ २३ ॥

कदेति—त्रिदशतटिन्या भागीरथ्या वीचीभिस्तरंगैर्मुखरे सशब्दे मरालीचक्राणां हंसीकदम्बानां स्थित्या वासेन सुखैः सुखकारकै रवैः शब्दैराक्रान्ते पुलिने तीरे क्वचिदप्येकान्ते विजने निकुञ्जे स्थितस्येति शेषः । मम प्रतिदिवसमुल्लासेनाल्हादेन मिलिता यक्ताः सधाधाराप्राया अमृतव-

Digitized by Google

म्भुरा इत्यर्थः । गोविन्द गोविन्देति गिरः कदा भविष्यन्ति ॥ २३ ॥

यदध्यस्तं सर्वं स्रजि भुजगवद्भाति पुरतो
महामायोद्गीर्णं गगनपवनाद्यं तनुभृताम् ।
भवेत्तस्या भ्रान्तेर्मुररिपुरधिष्ठानमुदये
यतो नस्याद्भ्रान्तिर्निरधिकरणा क्वापि जगति ॥२४॥

यदिति–यदध्यस्तं यया भ्रान्त्याध्यस्तमध्यारोपितं महामायया उद्गीर्णं प्रसूतं सर्वं गगनपवनाद्यं पृथिव्यादिमहाभूतपञ्चकं तनुभृतां प्राणिनां पुरत अग्रे स्रजि भुजगवद्भाति तस्या भ्रान्तेरुदये प्रादुर्भावेऽधिष्ठानं मुररिपुः श्रीकृष्ण एव । यतो निरधिकरणाधिष्ठानं विना जगति भ्रान्तिरेव न स्यात् । सर्वमेतज्जगद्यत्पुरोऽवलोक्यते सा भ्रान्तिरेव । भ्रान्तिश्चेत्तस्या अधिष्ठानेन केनापि भवितव्यमेव । अन्यथा तस्याः प्रादुर्भावासंभवात् । यथा स्रजि भुजगभ्रान्तिरिति भुजगभ्रान्तेरधिष्ठानं स्रक्, रज्जौ सर्पभ्रान्तिरिति सर्पभ्रान्तेरधिष्ठानं रज्जुः, यथा च शुक्तौ रजतभ्रान्तिरिति रजतभ्रान्तेरधिष्ठानं शुक्तिस्तथात्रापि जगद्भ्रान्त्या अधिष्ठानं मुररिपुः साक्षात्परब्रह्म । अतः सर्पोऽयं मे भ्रान्त्या दृश्यत इति ज्ञानादेव यथा तदधिष्ठानस्य रज्वादेरनायासेन ज्ञानं भवति तथैव जगदिदं सर्वं भ्रान्तिजन्यमिति ज्ञानादत्तधिष्ठानभूतस्य ब्रह्मणो ज्ञानमनायासेन भविष्यतीति विशदार्थः ॥२४॥

चिदेव ध्यातव्या सततमनवद्या सुखतनु-
र्निराधारा नित्या निरवधिरविद्यादिरहिता ।
अनास्थामास्थाय भ्रमवपुषि सर्वत्र विषये
सदा शेषव्याख्यानिपुणमतिभिः ख्यातयतिभिः ॥२५॥

सदा निरन्तरं शेषस्य परमात्मनो व्याख्या नाम तस्यां निपुणा मतिर्येषां तैः ख्यातयतिभिर्योगीश्वरैः सर्वत्र भ्रमवपुषि भ्रान्त्यात्मके विषये देहादावनास्थामास्थायानादरं विधाय सुखतनुरानन्दस्वभावा निराधाराऽऽधाररहिता निरवधिरनन्ताऽविद्यादिरहिता मायाविहीना नित्या चिदेव चैतन्यमेव ध्यातव्या चिन्तनीया ॥ २५ ॥

अहोऽत्यर्थेऽप्यर्थे श्रुतिशतगुरुभ्यामवगते
निषिद्धत्वेनापि प्रतिदिवसमाधावति मनः ।
पिशाचस्तत्रैव स्थिररतिरसारेऽपि चपलं
न जाने केनास्य प्रतिकृतिरनार्यस्य भविता ॥ २६ ॥

Digitized by Google

अहो इति खेदे, श्रुतीनां वेदवाक्यानां शतं, शतशब्दोऽत्रानन्तवाची। गुरुराचार्यश्चताभ्यां निषिद्धत्वेन "अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम्" इत्यादिना निषेधरूपेणावगते ज्ञातेऽपि अनर्थेऽर्थमतिक्रान्तेऽनर्थकारणेऽप्यर्थे द्रव्ये प्रतिदिवसं निरन्तरमित्यर्थः। मनो धावति। चपलं मनः पिशाचस्तत्रैवासारेऽर्थ एव स्थिरा रतिर्यस्य तादृश आसक्त इत्यर्थः। तदनार्यस्य दुष्टस्येति यावत् अस्य मनःपिशाचस्य प्रतिकृतिः प्रतीकारः केनोपायेन भविता भविष्यतीति न जाने ॥२६॥

नित्यानित्यपदार्थतत्वविषये नित्यं विचारः सतां
संसर्गे मितभाषिता हितमिताहारोऽनहंकारिता।
कारुण्यं कृपणे जने सुखिजने प्रीतिः सदा यस्य स
प्रायेणैव तपः करोति सुकृती चेतोमुकुंदप्रियः ॥ २७ ॥

यस्य पुरुषस्य नित्यं निरन्तरं नित्यानामनित्यानाञ्च पदार्थानां तत्वविषये विचारः, सतां सज्जनानां संसर्गे संगतौ च विचारः, मितभाषिता परिमितभाषणशीलं हितो हितकरो मितश्चाहारः, कृपणे दुःखभाजि जने कारुण्यं चेतसि मुकुन्दः प्रियो यस्य स सुकृती पुण्यवान् प्रायेण तप एवं करोति। न हि केवलं गृहादिकं संन्यस्य गहायामेव तपश्चीर्यते किन्तु लोकोक्तरीत्याऽऽचरणं गृहस्थाश्रमेऽपि तपस्यात्मनां परिणतं तत्फलं प्रयच्छतीति भावः। शार्दूलविक्रीडितं वृत्तम्। 'सूर्याश्वैर्मसजस्ततः सगुरवः शार्दूलविक्रीडितम्' इति तल्लक्षणात्। अतः परं षट् श्लोका अनेनैव वृत्तेनोपनिबद्धाः ॥ २७ ॥

सा गोष्ठी सुहृदां निवारितसुधास्वादाधुना कागम-
त्तेधीरा धरणीधरोपकरणीभूता ययुः कापरे।
ते भूपा भवभीरवो भवरताः कार्गुनिरस्तारयो
हा कष्टं कचग गम्यते नहि सुखं काप्यस्ति लोकत्रये ॥२८

निवारितस्तिरस्कृतः सुधाया अमृतस्य स्वादो माधुर्यं यया सा सुहृदां गोष्ठी समाजोऽधुना क कुत्रागमत्। ते प्रसिद्धा धरणीधराणां राज्ञामुपकरणीभूता अपरे धीराः क ययुः। भवात्संसाराद्भीरवो, भवे शंकरे रताः निरस्ता नाशिता अरयो यैस्ते भूपाः क ययुरित्यनुषज्यते। हा कष्टमिति खेदे क च गम्यते मयेति शेषः। लोकत्रये कापि सुखं नास्ति। लब्धकीर्तयो महाप्रभावाः पुरातना महान्तो धीरवीरादयः कदानीं गताः क

Digitized by Google

चाहं गन्तास्मीति न ज्ञायते तस्मादहो दुरधिगम्यतास्य जगत इति भावः ॥२८

भानुर्भूवलयप्रदक्षिणगतिः क्रीडारतिः सर्वदा
चन्द्रोप्येष कलानिधिः कवलितः स्वर्भानुना दुःखितः ।
ह्रासं गच्छति वर्धते च सततं गीर्वाणविश्रामभू-
स्तत्स्थानं खलु यत्र नास्त्यपहृतिः क्लेशस्य संसारि-
णाम् ॥ २९ ।

भानुः सूर्यो भूवलयस्य प्रदक्षिणं गतिर्यस्य तादृशः। निरन्तरं पृथ्वीं परितो भ्राम्यतीत्यर्थः। कलानां निधिः क्रीडारतिः क्रीडासक्त एष चन्द्रोऽपि स्वर्भानुना राहुणा कवलितो ग्रस्तः सन् दुःखितः। गीर्वाणानां देवानां विश्रामभूः निवासस्थानं स्वर्गोऽपि सततं वर्धते ह्रासञ्च गच्छति। तत्तस्माद्यत्र संसारिणां क्लेशस्यापहृतिर्नाशस्तत्स्थानं न विद्यते। संसारिणां न कुत्रापि सुखमिति भावः ॥ २९ ॥

संसारेऽपि परोपकारकरणख्यातव्रता मानवा
ये संपत्तिगृहा विचारचतुरा विश्वेश्वराराधकाः ।
तेऽप्येनं भवसागरं जनिमृतिग्राहाकुलं दुस्तरं
गंभीरं सुतरां तरन्ति विविधव्याध्याधिवीचीमयम् ३०

संसारेऽपि परोपकारकरणे ख्यातं व्रतं येषां तादृशाः, संपत्तिर्गृहे येषां ते, विचारचतुरा, विश्वेश्वराराधका ये मानवाः सन्ति ते जनिर्जन्म मृतिर्मरणञ्चैव ग्राहास्तैराकुलं व्याप्तं, विविधा व्याधयः शारीरव्यथा आधयो मनोव्यथा एव वीच्यस्तरंगास्तैःप्रचुरं, सुतरां गंभीरं निम्नमत एव दुस्तरमप्येनं भवसागरं संसारसमुद्रं तरन्ति। नहि केवलं पुत्रकलत्रगृहादिकं संन्यस्यैव मोक्षो लभ्यते किन्तु यत्रकुत्रापि सञ्चरितैर्विश्वेश्वराराधनं कृतञ्जन्मबन्धनान्मुच्यन्ते प्राणिन इति फलितार्थः ॥ ३० ॥

रे रे चित्त मदान्ध मोहबधिरा मिथ्याभिमानोद्धता
व्यर्थेयं भवतां धनावनरतिः संसारकारागृहे ।
षड्वानां निगडेन गात्रममतासंज्ञेन यत्कर्हिचि-
देवब्राह्मणभिक्षुकादिषु धनं स्वप्नेऽपि न व्येति वः ॥३१॥

रे रे इति कष्टाह्वाने मदान्ध चित्त मनः इयं मोहेन मायया बधिरा श्रोत्रेन्द्रियरहिता श्रुत्यादिभिर्बोधिताऽपि न प्रबुध्यत इत्यर्थः। अभिमानिनं गर्वेणोद्धता औद्धत्यम्। पदमिदमसाधु प्रतिभाति। 'अभिमानोद्धतां'

इत्यनेनात्र पदेन भाव्यम् । मिथ्या वृथा । संसारकारागृहं भवतां युष्माकम् । सर्वेषां प्राणिनां मनांस्यपि त्वत्सदृशाण्येवेति बोधनायात्र बहुवचनम् । तेन भवादृशानां सर्वेषामित्यर्थः । इयं धनावनरतिर्द्रव्यरक्षणलालसा व्यर्था । यद्यस्माद्गात्रममता शरीरममतेति संज्ञा यस्य तादृशेन निगडेन बद्धानां वो भवतां धनं कर्हिचित्कदाचिदपि देवब्राह्मणभिक्षुकादिषु स्वप्नेपि न व्येति गच्छति । द्रव्यार्जनस्य दानमेव फलं न तु सञ्चय इति भावः ॥ ११ ॥

यावत्ते यमकिङ्करा: करतलक्रूरासिपाशादयो
दुर्दान्ता: सृणिराजदीर्घसुनखा दंष्ट्राकरालाननाः ।
नाकर्षन्ति नरान्धनादिरहितान्यत्तावदिष्टेच्छया
युष्माभिः क्रियतां धनस्य कृपणास्त्यागः सुपर्वादिषु १२

हे कृपणाः दुर्दान्ता दुर्निवारा दंष्ट्राभिः करालानि भीषणान्याननानि मुखानि येषां ते करतलेषु क्रूरा असिपाशादयः खड्गपाशादयो येषान्ते प्रसिद्धा यमकिङ्कराः कालदूता यावद्धनादिरहितान्यक्तसर्वस्वानित्यर्थः । नाकर्षन्ति तावदिष्टस्य स्वर्गस्य मोक्षस्य वेच्छया सुपर्वादिषु युष्माभिर्धनस्य त्यागः क्रियताम् । यच्छन्दोऽत्र तृतीयपादे निष्प्रयोजनो लक्ष्यते । ॥ १२ ॥

देहाद्यात्ममतानुसारि भवतां यद्यस्ति मुग्धं मतं
वेदव्यासविनिन्दितं कथमहो पित्राद्यपत्ये तदा ।
दाहादिः क्रियते विशुद्धफलको युष्माभिरुद्वेजितैः
शोकेनार्थपरायणैरपसदैर्दृष्टार्थमात्रार्थिभिः ॥१३॥

यदि भवतां वेदव्यासेन विनिन्दितं, देह आदिर्येषां त आत्मेति मतमनुसरतीति तत् । तथा चाह शारीरभाष्ये भगवान् शंकरः 'देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृता जना लोकायतिकाश्च' इति । आदिशब्दात्पुत्रः, इन्द्रियाणि मनो वाऽऽत्मेत्यादीनि मतानि गृह्यन्ते । मुग्धं मूढं मतमस्ति तदाऽहो इत्याह्वाने शोकेन दुःखेनोद्वेजितैः पीडितैरर्थो धनमेव परमयनं येषां तैरत एवापसदैर्नीचैर्दृष्टा अर्थाः पदार्था एव दृष्टार्थमात्रं तस्यार्थिनः प्रेप्सवस्तैः प्रत्यक्षप्रमाणैकगम्याभिलाषिभिरित्यर्थः । युष्माभिः पित्राद्यपत्ये पित्रादय अपत्यानि च तेषां समाहारस्तस्मिन् विशुद्धं फलं यस्य स दाहादिः कथं क्रियते । नहि देहादीनां विनाशिनामात्मत्वं सम्भवतीति भावः ॥ १३ ॥

Digitized by Google

अद्यश्वो वा मरणमशिवप्राणिनां कालपाशै-
राकृष्टानां जगति भवतो नान्यथात्वं कदाचित् ।
यद्यप्येवं न खलु कुरुते हा तथाप्यर्थलोभं
हित्वा प्राणी हितमवहितो देवलोकानुकूलम् ॥ १४ ॥

जगति भवतो भवे संसारे सप्तम्यर्थे तसिल् । कालपाशैराकृष्टानामशिवानामसतां प्राणिनां मरणमद्य वाश्वः सुनिश्चितमेवेति शेषः । अन्यथात्वं मरणाभाववत्वं कदाचिदपि न भवतीति शेषः । यद्यप्येव तथापि प्राणी जीवः खल्ववहितः प्रबुद्धः सन्नर्थलोभं हित्वा परित्यज्य देवलोकानुकूलं हितं हितकरं न करुते । तीर्थादौ देवब्राह्मणाभिक्षुकादिषु धनं न वितरतीत्यर्थः । मन्दाक्रान्ता वृत्तम् 'मन्दाक्रान्ता जलधिषडगैर्भौ नतौ तादुरू चेत्' इति लक्षणात् । अतः परं त्रयः श्लोका अनेनैव वृत्तेन निबद्धाः ॥ १४ ॥

दृष्टप्रायं विकलमखिलं कालसर्पेण विश्वं
क्रूरेणेदं शिव शिव मुने ब्रूहि रक्षाप्रकारम् ।
अस्यास्त्येकः श्रुणु मुररिपोर्ध्यानपीयूषपानं
त्यक्त्वा नान्यत्किमपि भुवने दृश्यते शास्त्रदृष्ट्या ॥ १५ ॥

शिव शिवेति खेदे । हे मुने क्रूरेण निर्घृणेन कालसर्पेणेदमखिलं विश्वं जगत् दृष्टप्रायं प्रायः कालसर्पविषबाधितमेवेत्यर्थः । दृष्टिविषोऽयं कालसर्पः 'कालिको नाम सर्पो यो दृष्टीविष उच्यते' इत्यादि निगमात् । तत्तस्माद्रक्षाप्रकारं रक्षणोपायं ब्रूहि कथय । प्रत्युत्तरमुत्तरार्धेण न्यस्यति । अस्यैको रक्षाप्रकारोऽस्ति । कोऽसावित्याकाङ्क्षायामाह । श्रुणु अवधेहि भुवनेऽस्मिन् जगति मुररिपोः श्रीकृष्णस्य ध्यानमेव पीयूषममृतं तस्य पानं मुक्त्वाऽन्यत्किमपि शास्त्रदृष्ट्या न दृश्यते । कालसर्पविषबाधितस्य मुररिपुध्यानमेव जीवातुरिति भावः ॥ १५ ॥

ध्यानश्यग्रं भवतु तव हृत्तिष्ठतो यत्र तत्र
श्रीमद्विष्णोस्त्रिभुवनपतेर्नित्यमानन्दमूर्तेः ।
लक्ष्मीचेतःकुमुदविपुलानन्दपीयूषधाम्नो
मेघच्छायाप्रतिभटतनोः क्लेशसिंधुं तितीर्षोः ॥ १६ ॥

क्लेशसिंधुं दुःखसागरं तितीर्षोस्तरीतुमिच्छोर्यत्र तत्र यत्रकुत्रचित्तिष्ठतः सतस्तव हृन्मनो लक्ष्म्याश्चेत एव कुमुदानि तेषां विपुलानन्दाय महा-

Digitized by Google

नन्दाय पीयूषधाम्नश्चन्द्रस्य । मेघस्य छायायाः प्रतिभटा तिरस्कारिणीत्यर्थः तनुर्यस्य तस्य त्रिभुवनपतेस्त्रैलोक्यनाथस्यानन्दमूर्तेरानन्दस्वभावस्य श्रीमद्विष्णोर्ध्याने चिन्तने व्यग्रमासक्तं भवतु ॥ ३६ ॥

कामव्याघ्रे कुमतिफणिनि स्वान्तदुर्वारनीडे
मायासिंहीविहरणमहीलोभभल्लूकभीमे ।
जन्मारण्ये न भवति रतिः सज्जनानां कदाचि-
त्तत्त्वज्ञानां विषयतृषिताकण्टकाकीर्णपार्श्वे ॥ ३७ ॥

कामा इन्द्रियविषयोपभोगेच्छा एव व्याघ्रा यस्मिन् तादृशे, कुमतय एव फणिनः सर्पा यस्मिन् तथाविधे, स्वान्तं चित्तमेव दुर्वाराणि नीडानि पक्षिनिवासस्थानानि यस्मिन् तादृशे, माया एव सिंही तस्या विहरणमही विहारस्थानं तेन लोभ एव भल्लूकस्तेन च भीमे भयंकरे विषय एव तृषिताकण्टकानि तैराकीर्णौ पार्श्वौ समीपभागौ यस्य तस्मिन् जन्मरूपेऽरण्ये कदाचिदपि सज्जनां रतिःप्रीतिर्न भवति । कामादयो व्याघ्रादय इव प्राणिनो नाशयन्तीति भावः ॥ ३७ ॥

यामासाद्य त्रिलोकीजनयहितशिवावल्लभारामभूमिं
ब्रह्मादीनां सुराणां सुखवसतिभुवो मण्डलं मण्डयन्तीम् ।
नो गर्भे व्यालुठन्ति क्वचिदपि मनुजा मातुरुत्क्रान्तिभाज-
स्तां काशीं नो भजन्ते किमिति सुमतयो दुःखभारं
वहन्ते ॥ ३८ ॥

त्रिलोकीजनैस्त्रैलोक्यस्थजनैर्महिता पूजिता सा चासौ शिवावल्लभस्य पार्वतीपतेः शंकरस्यारामभूमिं विहारस्थानं ब्रह्मादीनां सुराणां देवानां सुखवसतिभुवः सुखावासस्थानस्य मण्डलं मण्डयन्तीं भूषयन्तीं यामासाद्य प्राप्य गत्वेत्यर्थः । उत्क्रान्तिभाजो मरणाधीना मनुजा मातुर्गर्भे नो न व्यालुठन्ति पुनर्जन्म न प्राप्नुवन्तीत्यर्थः । तां तादृशीं काशीं सुमतयः प्रज्ञावन्तोऽपि किमिति कस्य हेतोर्न भजन्ते किमिति च दुःखभारं वहन्ते तन्न जानीमहे इति शेषः । स्रग्धरावृत्तम् । 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयमि' ति तल्लक्षणात् ॥ ३८ ॥

किं कुर्मः किं भजामः किमिह समुदितं साधनं किं वयस्याः
संसारोन्मूलनाय प्रतिदिवसमिहानर्थशंकावतारः ।
आतङ्कार्तं निदानं भवभयदलने संगतं सज्जनां

तां काशीमाश्रयामो निरुपमयशसः स्वःसरन्त्या वयस्याम् ॥३९॥

हे वयस्याः सखायः इहास्मिन् जगति संसारोन्मूलनाय नाशाय किं कुर्मः, किं भजामः, साधनं किं, समुदितं समुदयः किं केनोपायेनोद्याम्यो मुक्ता संसारबंधनादित्यर्थः । यत इहास्मिन् संसारे प्रतिदिवसं निरन्तरमनर्थानामनिष्टानां दुःखानामित्यर्थः शंका संशयस्तस्या अवतारः प्रादुर्भावः । दुःखापातभयं निरन्तरमुदेतीति भावः । उक्तञ्चान्यत्र 'उत्थायोत्थाय बोद्धव्यं मद्भयमुपस्थितं । मरणव्याधिशोकानां किमद्य निपतिष्यति' इति । किञ्चिदालोच्य पुनराह हे भ्रातः । नात्रैकवचनं दोषाय वयस्यानामेकतमं प्रत्युद्दिश्योक्तत्वात् । भवभयदलने संसारभयनाशने निदानमुपाय इत्यर्थः ज्ञातम् । किं तदित्याकाङ्क्षायामाह— सज्जनानां सतां संगतं समागम एव । अतस्तदभ्यासाय निरुपममतुलं यशो यस्यास्तस्याः स्वःसरन्त्या भागीरथ्या वयस्यां सखीं तां प्रसिद्धां काशीमाश्रयामः । सकलसज्जनशिरोभूषणायाः काश्याः समागमोऽस्मत्संसारभयमपहरिष्यतीति भावः ३९

भुक्तिः क्वापि न मुक्तिरस्त्यभिमता काप्यस्ति मुक्तिर्न सा
काश्यामस्ति विशेष एव सुतरां श्लाघ्यं यदेतद्वयम् ।
सर्वैरुत्तममध्यमाधमजनैरासाद्यतेऽनुग्रहा-
देवस्य त्रिपुरद्विषः सुरधुनीस्नानावदातव्ययैः ॥४०॥

क्वापि कुत्रचित्तीर्थादौ भुक्तिर्भोग एवास्ति । अभिमतेष्टा मुक्तिर्मोक्षो न विद्यत इति शेषः । तस्मात्स्याज्यमेतादृशस्थानं मुक्तेरीप्सिततमत्वात् । क्वापि कुत्रचिदन्यत्र मुक्तिर्मोक्ष एव, सा भुक्तिर्भोगो न विद्यत इति शेषः । स्मृतिरपि " आगमो निष्फलस्तत्र भुक्तिः स्तोकापि यत्र ! नो " इति । काश्यां तु विशेष एवास्ति तीर्थान्तरादिति शेषः । यद्यस्मात्सुतरामतिशयेन श्लाघ्यं स्तुत्यमीप्सिततममित्यर्थः एतद्वयं भुक्तिमुक्त्यात्मकं तत्रास्तीति शेषः । अत एव त्रिपुरद्विषो देवस्य शंकरस्यानुग्रहात्कृपावशात्सर्वैरुत्तममध्यमाधमजनैः कर्तृभिः सुरधुनीस्नानं गंगास्नानञ्चावदातव्ययानि शुद्धदानानि च तैः सह सा काशी आसाद्यते प्राप्यते । मुमुक्षवस्तीर्थान्तरं परित्यज्य तत्र गत्वा शिवप्रसादाद्गंगास्नानं काशीवासफलं भुक्तिं मुक्तिञ्च प्राप्नुवन्तीति सरलार्थः । शार्दूलविक्रीडितं वृत्तम् । लक्षणमुक्तं प्राक् ॥४०॥

विद्यन्ते द्वारकाद्या जगति कति न ता देवताराजधान्यो

यद्यप्यन्यास्तथापि स्खलदमलजलावर्तगंगातरंगा ।
काश्येवारामकूजत्पिकशुकचटकाक्रान्तदिक्कामिनीनां
क्रीडाकासारशाला जयति मुनिजनानंदकन्दैकभूमिः
॥ ४१ ॥

जगति ताः सुप्रसिद्धा द्वारकाऽऽदिर्यासां ता देवताराजधान्यः कति न विद्यन्ते । अपि तु बहवो विद्यन्त इत्यर्थः । अन्या राजधान्यो यद्यपि विद्यन्ते तथापि कुसुमानां परिमलो मनोहरो गंधस्तेनाकृष्टा अत एव हृष्टा अलिमाला भ्रमरपङ्क्तयो यस्यां तादृशी । आरामेषूपवनेषु कूजन्तीभिः पिकाः कोकिलाः शुकाश्चटकाश्च ताभिराक्रान्ता दिक्कामिनीनां दिक्पुरन्ध्रीणां शय्यादीनां क्रीडाकासारस्य विहारसरसः शाला स्थानं काश्येव । स्रग्धरा वृत्तम् । लक्षणमुक्तं प्राक् ॥ ४१ ॥

काशीयं समलंकृता निरुपमस्वर्गापगाव्योमगा-
स्थूलोत्तारतरंगबिन्दुविलसन्मुक्ताफलश्रेणिभिः ।
चञ्चच्चञ्चलचञ्चरीकनिकरारागाम्बरा राजते
कासारस्थविनिद्रपद्मनयना विश्वेश्वरप्रेयसी ॥ ४२ ॥

निरुपमान्यतुलानि स्वर्गापगाया भागीरथ्या व्योमगानि गगनमुद्गच्छन्ति स्थूलानां बृहतामुत्तारणामुच्चैर्गच्छतां च तरंगाणां बिन्दून्येव विलसतां भास्वतां मुक्ताफलानां श्रेणयो मालास्ताभिः समलंकृता, चञ्चन्तो भ्रमन्तश्चञ्चलाश्च ये चञ्चरीका भ्रमरास्तेषां निकरस्य रागो वर्णो यस्य तदम्बरं यस्याः सा कासारस्थानि सरःस्थितानि विनिद्राणि प्रफुल्लानि पद्मान्येव नयने यस्याः सा विश्वेश्वरस्य प्रेयसी प्रियतमा काशी राजतेऽतितरां शोभते । शार्दूलविक्रीडितं वृत्तम् ॥ ४२ ॥

वन्हिमाकारबुद्धिं जनयति वलभीवासिनां नागराणां
गंधारण्यप्रसूतस्फुटकुसुमचयः किंशुकानां शुकानाम् ।
चञ्च्वाकारो वसन्ते परमपदपदं राजधानी पुरारेः
सा काश्यारामरम्या जयति मुनिजनानन्दकन्दैकभूमिः
॥ ४३ ॥

यत्रेत्यूह्यं वसन्ते ऋतौ शुकानां चञ्च्वाकारश्चञ्चुसदृशः किंशुकानां पलाशवृक्षाणां गंधारण्ये गंधवृक्षाश्चन्दनवृक्षास्तद्युक्ते काश्युपकंठस्थे वा तन्नामके कस्मिंश्चिदरण्ये । सानुस्वारो गकारोऽत्र द्वितीयपादादावस्माभि-

Digitized by Google

निवेशितः । लिखितपुस्तके तु केवलं 'धारण्ये' इत्येवोपलभ्यते । अ-क्षरान्तरं वा सूचयितव्यं सुधीभिः । प्रसूतानां स्फुटकुसुमानां फुल्लपुष्पाणां चयः समूहो वलभीवासिनां प्रासादाट्टालिकावासिनां नागराणां वन्हि-प्राकारबुद्धिमन्यावरणभ्रमं जनयति रक्तवर्णत्वादिति भावः । सा परमञ्च तत्पदं मोक्षाख्यं तस्य पदं स्थानं मोक्षस्थानमित्यर्थः । पुरारेः शंकरस्य राजधानी मुनिजनानामानन्दकन्दस्यैकभूमिरद्वितीयं स्थानं काशी जयति सर्वोत्कर्षेण वर्तते । स्रग्धरा वृत्तम् ॥ ४३ ॥

भजत विबुधसिंधुं साधवो लोकबंधुं
हरहसिततरंगं शंकराशीर्षसंगम् ।
दलितभवभुजंगं ख्यातमायाविभंगं
निखिलभुवनवन्द्यं सर्वतीर्थानवद्यम् ॥ ४४ ॥

हे साधवः शंकरस्य हसितं हास्यमिव तरंगा वीचयो यस्य तम् । 'यशांसि धवलत्वा वर्ण्यते हासकीर्त्योः' इति कविसमयाद्धरहसितपदेन धावल्यं तेन नैर्मल्यं पावनत्वञ्चापि व्यज्यते । शंकरस्याशीर्षं शिरोऽभिव्याप्य संगो यस्य तम् । लिखितपुस्तके " संकरासीमगंगम् " इति दृश्यते तद्दुर्बोधमशुद्धञ्चेति मत्वास्माभिरयं पाठः कल्पितः स चेत्साधीयानंगीकुर्वन्तु सुधियः । दलितो निहतः संसार एव भुजंगो येन तं, भुवनस्य जगतो वन्द्यं वन्दनीयं, सर्वेभ्यस्तीर्थेभ्योऽनवद्यं स्तुत्यं, लोकानां जनानां स्वर्गादीनां वा बंधुं बंधुवद्धितकरं विबुधसिंधुं देवनदीं भागीरथीं भजत । " सिंधुर्नदसरिति स्त्रियामि " ति कोशबलात्सरिद्वाचकस्य सिंधुशब्दस्य स्त्रीत्वेऽपि पुं-विशेषणं न दोषायेति सुधीभिर्बोध्यम् । मालिनी वृत्तम् । लक्षणमुक्तं प्राक् ॥ ४४ ॥

यदमृतममृतानां भंगरंगप्रसंग-
प्रकटितरसवत्तावैभवं पीतपुष्पैः ।
दलयति कलिदन्तांस्तां सुपर्वस्रवन्तीं
किमिति न भजतार्तो ब्रह्मलोकावतीर्णाम् ॥ ४५ ॥

अमृतानां पीयूषाणाम् । पद्मसां धरा इत्यादिवद्बहुवचनम् । भंगानां तरंगाणां रंगप्रसंगेन नृत्यप्रसंगेन प्रकटितं रसवत्तायाः माधुर्यस्य वैभवं येन तत् । अथवाऽमृतानां देवानां देवेभ्य इत्यर्थः प्रकटितमित्यनेन संबंधः । पीयूषपक्षेऽमृताधिकमाधुर्यसौभाग्यवत् देवपक्षे देवेभ्यः प्रक-

Digitized by Google

टितस्वमाधुर्यसंपदमृतान्धसैरपि तैः पीयमानत्वादित्यर्थः । यस्या भागीरथ्या अमृतं जलंमुच्चैरधिकं पीतं चेत्कलेर्दन्तान् कलिभयमिति यावद्दलयति नाशयति । ब्रह्मलोकादवतीर्णां लोकहितायागतां सुपर्वणां देवानां स्रवन्तीं नदीं तां भागीरथीं हे आर्ताः जन्ममरणभयपीडिताः किमिति कस्य हेतोर्न भजत न सेवध्वम् । मालिनी वृत्तम् ॥ ४५ ॥

स्वाधीने निकटस्थितेऽपि विमलज्ञानामृते मानसे
विख्याते मुनिसेवितेऽपि कुधियो न स्नान्ति तीर्थे द्विजाः।
यत्तत्कष्टमहो विवेकरहितास्तीर्थार्थिनो दुःखिता
यत्र क्काप्यटवीमटन्ति जलधौ.....॥ ४६ ॥

कुधियः कुमतयो द्विजा ब्राह्मणा स्वाधीने स्वायत्ते न तु पराधीने किञ्च निकटस्थितेऽपि समीपवर्तिन्यपि विमलज्ञानं ब्रह्मज्ञानमित्यर्थः अमृतं जलं यस्मिन् तस्मिन्विख्याते वेदादिषु प्रसिद्धे मुनिभिर्वसिष्ठादिभिः सेविते महाजनैरादृतेऽपि मानसे मनःसंबंधिनि मनोरूपे वा तीर्थे न स्नान्ति । किं तर्हि कुर्वन्तीत्यत आह यदिति— किन्वहो इति खेदे विवेकरहिताः कार्याकार्यज्ञानाभाववन्तः मूर्खा इत्यर्थः ते द्विजा दुःखिता भवपीडिता अत एव तीर्थार्थिनो तीर्थस्नानाभिलाषिणो यत्र क्काप्यटवीमरण्यमटन्ति भ्राम्यन्तीति यत्तत्कष्टं महद्दुःखकरमित्यर्थः । मोक्षफलकमात्मचिन्तनं मुक्त्वा बंधहेतुकं कर्ममार्गमनुधावतामहो मौग्ध्यमिति भावः । अपूर्णमेवेदं पद्यं लेखकहस्तदोषादिति यथादृष्टमत्र निवेशितं व्याख्यातञ्च । शार्दूलविक्रीडितं वृत्तम् ॥ ४६ ॥

नाभ्यस्तो धातुवादो न च युवतिवशीकारकः कोप्युपायो
नो वा पौराणिकत्वं न च सरसकविता नापि नीतिर्न गीतिः
तस्मादर्थार्थिनां या न भवति भवतश्चातुरी क्वापि विद्वन्
ज्ञात्वेत्थं चक्रपाणेरनुसर चरणाम्भोजयुग्मं विभूत्यै ॥४७॥

धातुवादो नाभ्यस्तः व्याकरणं नाधीतमित्यर्थः । युवतिवशीकारकः कोऽप्युपायश्च नाधिगत इति शेषः । मंत्रशास्त्रमपि नाधीतमित्यर्थः । पौराणिकत्वं वा नाधिगतम् । रसैः श्रृंगारादिभिः सहिता कविता कवित्वमपि न, नीतिर्न नीतिशास्त्रमपि नाधीतमित्यर्थः । गीतिरपि गानमपि नाधिगतमिति शेषः । तस्माद्धे विद्वन्नित्यादरे अर्थार्थिनां द्रव्ययाचकानां या चातुरी चातुर्यं भवति सा चातुरी भवतस्तव नास्ति । इत्थं ज्ञात्वा वि-

Digitized by Google

भूत्यै कल्याणाय चक्रपाणेर्विष्णोश्चरणाम्भोजयुग्मं पादकमलद्वयमनुसर । स्रग्धरा वृत्तम् ॥ ४७ ॥

अर्थेभ्योऽनर्थजातं भवति तनुभृतां यौवनादिष्वदश्यं
पित्राद्यैरर्जितेभ्योऽनुपकृतिमतिभिः स्वात्मनैवार्जितेभ्यः ।
यस्माद्दुःखाकरेभ्यस्तमनुसर सदा भद्र लक्ष्मीविलासं
गोपालं गोपकान्ताकुचकलशतटीकुंकुमासंगरंगम् ।४८।

यद्यस्माद्यौवनादिषु तारुण्यादिषु अनुपकृतिमतिभिः कृपणैरित्यर्थः पित्राद्यैः पूर्वजैरर्जितेभ्यः सञ्चितेभ्य इत्यर्थः । स्वात्मना स्वयं वाऽर्जितेभ्यो दुःखाकरेभ्यो वित्तेभ्यस्तनुभृतां मनुष्याणामवश्यमनर्थजातं भवति बहवोऽनर्था भवन्तीत्यर्थः । तस्मात् हे भद्र मित्र गोपकान्तानां गोपीनां कुचतटीषु यत्कुंकुमं तत्रयऽऽसंगं दृढं यथा तथा रंगो रागो यस्य तम् । लक्ष्मीविलासं रमाकान्तं तं गोपालं श्रीकृष्णमनुसर चिन्तयेत्यर्थः । लिखितपुस्तके यद्यपि " स्वात्मनैव " इति दृश्यते तथाप्यर्थानुसंधानादस्माभिः " स्वात्मना वा" इति पाठः कल्पित इति बोध्यम् । स्रग्धरा वृत्तम् ॥ ४८ ॥

भ्रातः शान्तं प्रशान्तं क्वचिदपि निपतन्मित्र रे भूधराग्रे
ग्रीष्मे ध्यानाय विष्णोः स्पृहयसि सुतरां निर्विशंके गुहायाम्।
अन्वेष्यन्तादृगत्र क्षितिवलयतले स्थानमुन्मूल याव-
त्संसारानर्थवृक्षं प्रथिततममहामोहमूलं विशालम् ।४९।

रे मित्र निर्विशङ्के विजन इत्यर्थः । भूधराग्रे पर्वतशिखरे ग्रीष्मे ऋतौ क्वचिदपि गुहायां निपतन्निवसन् विष्णोर्ध्यानाय सुतरामत्यन्तं स्पृहयसीति काकुः । स्पृहयसि किमित्यर्थः । स्पृहयसि चेत् हे भ्रातः शान्तं प्रशान्तमलमलम् । मा मैवं कुर्वित्यर्थः । अथवा प्रशान्तमिति निपतन्नित्यस्याः क्रियायाः विशेषणम् । किं तर्हि क्रियतामित्याशंक्याह—अत्रास्मिन् क्षितिवलयतले भूतले तादृक् निर्विशंकमित्यर्थः । स्थानमन्वेष्यन् प्रथिततमानि सुप्रसिद्धानि महामोह एव मूलानि यस्य तं विशालं विस्तृतं यावत्सकलं संसार एवानर्थवृक्षस्तमुन्मूलोत्पाटय । अन्तर्भावितण्यर्थोऽत्र मूलतिः । अदूरवर्तिनं सुलभफलकं स्थानं परित्यज्य सुदूरवर्तिनं दुरधिगम्यफलकं मा गम इति भावः । स्रग्धरा वृत्तम् ॥ ४९ ॥

कुत्र तत्स्थानं किञ्च तदित्याकाङ्क्षायामाह—

केदारस्थानमेकं रुचिरतरमुमान'व्यलीलावनीकं

प्रालेयाद्रिप्रदेशे प्रथितमतितरामस्ति गंगानिवेशे ।
ख्यातं नारायणस्य त्रिजगति बदरीनाम सिद्धाश्रमस्य
तत्रैवानादिमूर्तेर्मुनिजनमनसामन्यदानन्दमूर्तेः ॥ ५० ॥

एकं तु प्रालेयाद्रेर्हिमाल्यस्य प्रदेशे गंगाया निवेशे तीर इति यावत् । रुचिरतरमतिमनोहरमुमायाः पार्वत्या नाट्यलीलावनीं नृत्यक्रीडास्थानं यत्र तत् अतितरां प्रथितं सुप्रसिद्धं केदारस्थानं 'बद्रिकेदार' इति भाषायां प्रसिद्धमस्ति । तत्रैव सिद्धानां योगिनामाश्रमस्याश्रयभूतस्यानादिमूर्तेर्मुनिजनमनसामानन्दमूर्तेर्मूर्तिमदानन्दस्य नारायणस्य त्रिजगति ख्यातं बदरीनाम बदरी इति नाम्ना प्रसिद्धमन्यत्स्थानमस्तीति शेषः ॥ ५० ॥

सन्त्यन्ये त्रिदशापगादिपतनादेव प्रयागादयः[1]
प्रालेयाचलसंभवा बहुफलाः सिद्धाश्रमाः सिद्धयः ।
यत्राघौघसहा भवन्ति सुधियां ध्यानेश्वराणां चिरं
मुक्ताशेषभियां विनिद्रमनसां कन्दाम्बुपर्णाशिनाम् ।५१।

प्रालेयाचले हिमाद्रौ संभवो जन्म येषां ते, त्रिदशापगा देवनदी भागीरथी आदिर्यासां तासां पतनात्प्रवाहाद्बहु बहुलं फलं पुण्यं येषु ते प्रयागादयः अन्ये सिद्धाश्रमा योगिजननिवासोचितस्थानानीत्यर्थः सन्त्येव । यत्र येषु सिद्धाश्रमेषु विनिद्रं गलिततमस्कामित्यर्थः मनश्चित्तं येषां तेषां कन्दाम्बुपर्णाशिनां सतां चिरं निरन्तरं ध्याने ईश्वरो येषां तेषां निरन्तरमीश्वरध्यानैकपराणामित्यर्थः । अत एव मुक्ता परित्यक्ताऽशेषा सकला भीर्भयं यैस्तादृशानां विगतजनिमरणभीतीनां सुधियां सुबुद्धीनामघौघान्पापपुञ्जान् सहन्त्यभिभवन्ति दूरीकुर्वन्ति ताः । सह मर्षणेऽभिभवे चेति धातुपाठः । सिद्धयोऽणिमादयो भवन्ति । शार्दूलविक्रीडितं वृत्तम् ॥ ५१ ॥

किं स्थानस्य निरीक्षणेन मुरजिद्ध्यानाय भूमण्डले
भ्रातश्चेद्विरतिर्भवेद्दृढतरा यस्य स्रगादौ सदा ।
तस्यैषा यदि नास्ति हन्त सुतरां व्यर्थं तदान्वेषणं
स्थानस्यानधिकारिणः सुरधुनीतीराद्रिकुञ्जादिषु ।५२।

किमिति—हे भ्रातः यस्य पुरुषस्य स्रगादौ मालादौ भोगविषये सदा निरंतरं दृढतरा सुदृढा विरतिर्विरागश्चेद्भवेत् तर्हि तस्य भूमण्डले मुरजितो

---

१ Here the MS. reads त्रिदशापगापततदेव प्रयागादयः ।

Digitized by Google

मुकुंदस्य ध्यानाय स्थानस्य निरीक्षणेनान्वेषणेन किम् निष्फलं तदित्यर्थः। यदिच तस्य एषा विरतिर्नास्ति तदाऽनधिकारिणो विरक्तस्यैव तत्राधिकारित्वात्। सुरधुन्या भागीरथ्यास्तीरे अद्रौ पर्वते कुञ्जादिषु स्थानान्वेषणं हन्तेति खेदे सुतरां व्यर्थम्। विरक्तस्य विष्णुध्याने स्थानादिनिरपेक्षितत्वात्स्थानान्वेषणं व्यर्थमतथाभूतस्य तु विष्णुध्यानेऽनधिकारित्वात्स्थानान्वेषणं निष्फलतरम्। एवमुभयत्रापि स्थानाद्यन्वेषणं व्यर्थमिति फलितार्थः ॥ ९२ ॥

स्वान्तव्योम्नि निरस्तकल्मषघने सद्बुद्धितारावली-
संदीप्ते समुदेति चेन्निरुपमानन्दप्रभामंडलः।
ब्रह्मज्ञानसुधाकरः कवलिताविद्यान्धकारस्तदा
क्व व्योम क्व सदागतिः क्व हुतभुक् क्वाम्भः क्व सर्वंसहा ॥ ९३ ॥

स्वान्तेति—निरस्ताः कल्मषाणि पापान्येव घना मेघा यस्मात्तस्मिन् निर्मले इत्यर्थः। सद्बुद्धिः सुबुद्धिरेव तारावली नक्षत्रमाला तया संदीप्ते प्रकाशिते विवेकतारकिते इत्यर्थः। स्वान्तमेव व्योमाकाशं तस्मिन् चित्ताकाशे कवलितः अविद्या मोह एव अन्धकारो येन स निरुपमः आनन्द एव प्रभामंडलं कान्तिपुञ्जो यस्य स ब्रह्मज्ञानमेव सुधाकरश्चन्द्रः समुदेति चेत् यद्युदयति तदा व्योमादिकं महाभूतपंचकं क्व न भवतीत्यर्थः। सदागतिर्वायुः, हुतभुक् अग्निस्तेजः, अम्भ आपः, सर्वंसहा पृथ्वी। अन्यत् स्पष्टम्। अधिगतब्रह्मणो द्वैतमोहो विनश्यतीति भावः ॥ ९३ ॥

विश्वेश्वरे भवति विश्वजनीनजन्म-
विश्वम्भरे भगवति प्रथितप्रभावे।
यो दत्तचित्तविषयः सुकृती कृतार्थो
यत्र क्वचित्प्रतिदिनं निवसन् गृहादौ ॥ ९४ ॥

विश्वेश्वर इति—यः क्वचिद्गृहादौ निवसन्, आदिशब्दादद्रिकुञ्जवनानि गृह्यन्ते। प्रतिदिनं निरन्तरं विश्वेभ्यः सर्वेभ्यो जनेभ्यो हितं विश्वजनीनं जन्म यस्य स चासौ विश्वंभरो विश्वं बिभर्तीति सः प्रथितः प्रभावः सामर्थ्यं यस्य तस्मिन् भगवति सर्वैश्वर्य्यसंपन्ने विश्वेश्वरे शंकरे दत्तो निहितश्चित्तविषयो येन तादृशो भवति स सुकृती पुण्यवान् कृतार्थः सफलीकृतजन्मेत्यर्थः। वसंततिलका वृत्तम् ॥ ९४ ॥

चिद्रत्नमत्र पतितं वपुरंधकूपे

Digitized by Google

पुंसो भ्रमादनुपमं सहनीयतेजः ।
उद्धृत्य यो जगति तद्भविता कृतार्थो
मन्ये स एव समुपासितविश्वनाथः ॥ ५५ ॥

चिदिति—अत्रास्मिन् पुंसः पुरुषस्य वपुरेव अन्धकूपस्तमोव्याप्तकूपस्तस्मिन् भ्रमान्मोहाद्धेतोः अनुपममतुलं सहनीयं शान्तं तेजो यस्य तादृशं चित् चैतन्यमेव रत्नं पतितम् । यः तदुद्धृत्य कूपाद्बहिः समाहृत्य कृतार्थो भविता भविष्यति, स एव समुपासित आराधितो विश्वनाथो येन तादृश इति मन्ये । विश्वनाथोपासनायाश्चैतन्यावाप्तिरेव सुनिश्चितं फलमिति भावः । वसन्ततिलका वृत्तम् ॥ ५५ ॥

यद्येता मदनेषवो मृगदृशश्चेतःकुरंगारयो
धीराणामपि नो भवेयुरबलाः संसारमायापुरे ।
को नामामृतसागरे न रमते धीरस्तदा निर्मले
पूर्णानन्दमहोर्मिरम्यनिकरे रागादिनक्रोज्झिते ॥ ५६ ॥

यदिति—संसारमायापुरेऽस्मिन् जगति मदनस्येषवो बाणा धीराणां पंडितानां ज्ञानिनामपीति यावत्, चेतांस्येव कुरंगा हरिणास्तेषामरयः शत्रव एता मृगदृशो मृगनयनाः कामिन्यः नो भवेयुः नाभविष्यन् तदा रागः भोगेच्छा आदिर्येषां त एव नक्रास्तैरुज्झिते परित्यक्ते पूर्णानन्द एव महोर्मय उद्गच्छत्तरंगास्तेषां रम्यो निकरो माला यस्मिन् तस्मिन् निर्मले मलरहिते पापरहिते वा अमृतस्य ज्ञानामृतस्य वा सागरे परमात्मनि को नाम धीरः पंडितः न रमते रमेत । अपि तु सर्वोऽपि रमेतेत्यर्थः । मोहमयेऽस्मिन् जगति रूपवत्यो युवत्य एव सर्वेषां बंधहेतुः । ता यदि नाभविष्यन् सर्वेऽपि ब्रह्मानन्दास्वादमन्वभविष्यन्निति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ५६ ॥

बालेयं बालभावं त्यजति न सुदती यत्कटाक्षैर्विशालै-
रस्मान्विभ्रामयन्ती लसदधरदलाक्षिप्तचूतप्रवाला ।
नेतुं वाञ्छत्यकामान् स्वसदनमधुना क्रीडितुं दत्तचित्तान्
पुष्यन्नीलोत्पलाभे मुरजिति कमलावल्लभे गोपलीले
॥ ५७ ॥

बालेति—भर्तृहरेर्भार्या प्रत्यदिश्योक्तिरियम् । सुदती शोभना दन्ता यस्याः सेयं बाला मम भार्येत्यर्थः । तथा च भर्तृहरिर्निर्वेदनाटके पञ्च-

Digitized by Google

मांके " भयं बाला हालाहलबहलमाध्वीकमधुरा " इति भर्तृहरिवचने तद्भार्याया बालाशब्देन व्यवहारो द्रष्टव्यः । बालभावं मौग्ध्यं न त्यजति यद्यस्मात् लसद्भिः स्फुरद्भिरधरदलैरधरपल्लवैः आक्षिप्तास्तिरस्कृताः चूतप्रवाला आम्रतरुपल्लवानि यया सेयं पुष्यतां विकसतां नीलोत्पलानाम् आभेव आभा कान्तिर्यस्य तस्मिन् कमलाया लक्ष्म्या वल्लभे प्रिये मुरजिति श्रीकृष्णे दत्तचित्तान् अतएव अकामान्निष्कामानस्मान् अधुनेदानीं विषयावेरागानन्तरमित्यर्थः । विशालैः कटाक्षैर्भ्रूविक्षेपैः विभ्रामयन्ती मोहयन्ती सती स्वसदनं स्वगृहं नेतुं वाञ्छति । स्रग्धरा वृत्तम् ॥ ५७ ॥

शिव शिव महाभ्रान्तिस्थानं सतां विदुषामपि
प्रकृतिचपला धात्रा सृष्टाः स्त्रियो हरिणीदृशः ।
विजहति धनं प्राणैः साकं यतस्तदवाप्तये
जगति मनुजा रागाकृष्टास्तदेकपरायणाः ॥ ५८ ॥

शिवेति—शिव शिवेति खेदे, धात्रा विधिना सतां योगिनां विदुषां ज्ञानिनामपि महाभ्रान्तिस्थानं महामोहमूलं प्रकृतिचपला स्वभावचञ्चला हरिणीदृशो मृगनयनाः सृष्टाः । यतः रागेण प्रीत्या आकृष्टाः कर्षिता मनुजाः पुरुषाः तदेकपरायणाः ता एव एकं केवलम् अयनमाश्रयो येषां तादृशास्तदेकतानमनसस्सन्तः तासां हरिणीदृशामवाप्तये प्राप्तये प्राणैः साकं सह धनं विजहति त्यजन्ति । जहातेर्लटः प्रथमपुरुषस्य बहुवचनम् । हरिणी वृत्तम् । 'नसमरसलागः षड्वेदैर्हयैर्हरिणी मता' इति तल्लक्षणात् ॥ ५८ ॥

हरति वपुषः कान्तिं पुंसः करोति बलक्षितिं
जनयति भृशं भ्रान्तिं नारी सुखाय निषेविता ।
विरतिविरसा भुक्ता यस्मात्ततो न विवेकिभि-
र्विषयविरसैः सेव्या मायासमाश्रितविग्रहा ॥ ५९ ॥

हरतीति—यस्मात्सुखाय निषेविता नारी पुंसः पुरुषस्य वपुषः शरीरस्य कान्तिं हरति, बलक्षितिं बलहानिं करोति, भृशमतिशयं भ्रान्तिं मोहं जनयति, भुक्ता उपभुक्ता सती विरतौ रत्यवसाने विरसा रसहीना अप्रियेत्यर्थः भवतीति शेषः । ततस्तस्माद्धेतोः विषयविरसैर्विरक्तैरित्यर्थः । विवेकिभिर्ज्ञानिभिः मायया समाश्रितो विग्रहो देहो यस्याः सा न सेव्या । हरिणी वृत्तम् ॥ ५९ ॥

Digitized by Google

कमलवदना पीनोत्तुंगं घटाकृति बिभ्रती
स्तनयुगमियं तन्वी श्यामा विशालदृगंचला ।
विशददशना मध्यक्षामा वृथेति जनाः श्रमं
विदधति मुधारागादुच्चैरनीदृशवर्णने ॥ ६० ॥

कमलेति– जना मुधारागान्मिथ्यानुरागात् इयं कामिनी कमलवदना, पीनं पुष्टञ्च तदुत्तुंगमुन्नतं घटाकृति घटाकारं स्तनयुगं कुचद्वन्द्वं बिभ्रती धारयन्ती, तन्वी कोमलांगी, श्यामा तप्तकाञ्चनवर्णाभा "शीते सुखोष्णसर्वांगी ग्रीष्मे या सुखशीतला । तप्तकांचनवर्णाभा सा स्त्री श्यामेति कथ्यते ॥ इति तल्लक्षणात् । विशाले दृगंचले नयने यस्याः सा, विशदाः शुभ्रा दशना दन्ता यस्याः तादृशी, मध्यं कटिः क्षामं कृशं यस्यास्तादृशी इत्येवं प्रकारेण अनीदृशस्योक्तगुणविहीनायाःस्त्रिय इत्यर्थः वर्णने उच्चैर्महान्तं श्रमं कष्टं विदधति कुर्वन्ति । कामिनः खलु कार्याकार्यप्रतिपत्तिशून्या भवन्तीति भावः । हरिणीवृत्तम् ॥ ६० ॥

जनयति सुतं कञ्चिन्नारी सती कुलभूषणं
निरुपमगुणैः पुण्यात्मानं जगत्परिपालकम् ।
कथमपि न सा– निन्द्या वन्द्या भवेन्महतां यतः
सुरसरिदिव ख्याता लोके पवित्रितभूतला ॥ ६१ ॥

जनयतीति–स्त्रीणां निसर्गकौटिल्यं बंधहेतुत्वं च सामान्येन प्रदर्श्य साध्वीनामधिक्षेपदोषमिदानीमात्मनः परिहरति– यतः सती साध्वी नारी स्त्री कुलभूषणं वंशावतंसं पुण्यः पवित्र आत्मा यस्य तादृशं निरुपमगुणैर्जगत्परिपालकं कञ्चित्सुतं जनयति । अनिन्द्या निंदानर्हा पवित्रितं भूतलं यया सा लोके पृथिव्यां सुरसरिदिव भागीरथीव ख्याता सा महतां वन्द्या अपीति प्रश्ने कथं न भवेत् । अपि तु भवेदेवेत्यर्थः । सा निन्द्येति वा पदच्छेदः । तदायमर्थः । सा कथमपि केनापि प्रकारेण निन्द्या न भवेत्किन्तु वन्द्यैव । शेषं पूर्ववत् । नारीत्वात्तद्दोषवत्यपि सुरसरित्पुण्यात्मनो भीष्मस्य जननाद्यथा त्रैलोक्यवन्दनीयतां गता तथेत्युपमार्थस्तत्रभवद्भिराचार्यचरणैर्भट्टजीशास्त्रिभिः सूचितः । हरिणी वृत्तम् ॥ ६१ ॥

धन्या एते पुमान्सो यदयमहमिति त्यक्तचेतोविकल्पा
निश्शंकं संचरन्तो विदधति मलिनं कर्म कामप्रयुक्ताः ।
जानन्तोऽप्यर्थहीनं जगदिदमखिलं भ्रान्तवद्वैतजालं

Digitized by Google

तीर्थावस्थानजन्यं न भवति सुकृतं दुष्कृतोन्मूलनं वा
यस्मादाभ्यां विहीनः श्रुतिसमधिगतः प्रत्यगात्मा जनानाम् ।
सर्वेषामद्वितीयो निरतिशयसुखं यद्यपि स्वप्रकाशा-
स्तीर्थे विद्यास्तथापि स्पृहयति तपसे यत्तदाश्चर्यहेतुः ॥६४

तीर्थेति—यस्मात् सर्वेषां जनानां श्रुतिं समधिगतः प्राप्तः ज्ञानसंपन्न इत्यर्थः अद्वितीयः केवलः प्रत्यगात्मा प्रत्यक्शब्दवाच्योऽन्तरात्मा आभ्यां सुकृतदुष्कृताभ्यां विहीनो भवतीति शेषः । तथाच श्रुतयः "असंगोऽयं पुरुषः" "अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतादन्यत्र भूताच्च भव्याच्च" इत्यादयः । तस्मात्तीर्थे कायादावस्थानाज्जन्यं जातं सुकृतं पुण्यं दुष्कृतस्य पापस्योन्मूलनं नाशो वा यद्यपि न भवति, यद्यपि निरतिशयं नितरामतिशयं सुखं विद्यते यद्यपि च स्वमात्मानं प्रकाशयन्तीति ता विद्या आत्मविद्या भवन्तीति शेषः तथापि तीर्थे प्रयागादौ तपसे स्पृहयतीति यत् तदाश्चर्यहेतुः । स्रग्धरा वृत्तम् ॥ ६४ ॥

Digitized by Google

Digitized by Google

रागद्वेषादिमन्तो वयमयमिति हा न त्यजन्तेऽभिमानम्
॥ ६२ ॥

धन्या इति—एते श्रीशंकराचार्यादयः पुमांसो मनुष्या धन्याः, यद्यस्मादेते पुरुषाः अयंशब्दवाच्योऽन्यः अहंशब्दवाच्यश्चान्य इति त्यक्तश्वेतोविकल्पश्चित्तकल्पना यैस्ते, परित्यक्तद्वैतभावा इत्यर्थः। निःशंकं निर्भयं संचरन्तो भवन्तीति शेषः। इदं द्वैतं द्वैतकल्पना एव जालं बंधकारणं यत्र तादृशं, जगदवलोक्यैव जीवस्य द्वैतबंधापत्तेः। अखिलं जगत् अर्थहीनं निरर्थकं जानन्तोऽपि पुरुषाः कामप्रयुक्ता भोगासक्ताः सन्तः रागोऽनुरागो द्वेषश्च आदी येषां तद्वन्तः भ्रांतवत् भ्रांत इव मलिनं पापं कर्म विदधति कुर्वन्ति। 'वयम्, अयम्' इत्यात्मपररूपमभिमानं न त्यजन्ते। सुबुद्धयोऽपि भ्रान्तस्य कर्म स्वयं कुर्वन्तीत्यर्थः। "कर्तरिकर्मव्यतिहारे" इति तङ्। आत्मनि वयमिति बहुवचनप्रयोगः परस्मिन्नयमित्येकवचनप्रयोगोऽभिमान मूल इति ज्ञेयम्। स्रग्धरा वृत्तम् ॥ ६२ ॥

प्रज्ञावन्तोऽपि केचिद्विरमुपनिषदाद्यर्थकारा यतन्तो
व्याकुर्वन्तोऽपि केचिद्दलितपरमता यद्यपि ज्ञाततत्वाः।
तीर्थे तीर्थे तथापि भ्रमणरसिकतां नो जहत्यध्वखेदा
यत्तत्कष्टं विधत्ते मम मनसि सदा पश्यतस्तत्र कृत्यम्
॥ ६३ ॥

प्रज्ञेति— केचित्पुरुषा उपनिषदादीनामर्थकाराः अपि। कर्मण्यण्। केचित् यतन्त उपनिषदादिव्याख्याने यतमाना। चक्षिङो ख्यिकरणेन ख्यापकेन अनुदात्तेत्वनिमित्तस्यात्मनेपदस्यानित्यत्वादत्र परस्मैपदम्। केचित्तु व्याकुर्वन्तो व्याख्यातारः केचित् बुद्धिमन्तो ज्ञानिनः, केचित्तु दलितपरमता खण्डितवादिमताः, केचित्तु ज्ञाततत्वाः ज्ञातं तत्वं वेदप्रतिपादितोऽर्थो यैस्तादृशाः यद्यपि भवन्ति तथापि अध्वनि मार्गे खेदः कष्टं येषां ते अध्वखिन्नाः तीर्थे तीर्थे प्रतितीर्थं भ्रमणे विषये रसिकतामभिलाषमित्यर्थः नो जहति न त्यजन्तीति यत् तत्तत्र तेषामित्यर्थः. कृत्यं कर्तुं पश्यतः मम मनसि कष्टं दुःखं विधत्ते। जानन्तोऽपि मूढवदाचरन्तीति महत् मे दुःखं भवतीति भावः। स्रग्धरा वृत्तम् ॥ ६३ ॥

उदासीनो देवो मदनमथनः सज्जनकुले
कलिक्रीडासक्तःकृतपरिजनः प्राकृतजनः।

Digitized by Google

इयं म्लेच्छाक्रान्ता त्रिदशतटिनी चोभयतटे
कथं भ्रातःस्याता कथय सुकृती कुत्र विभयः ॥६५॥

उदासीन इति—हे भ्रातः देवो मदनमथनः शंकरः सज्जनकुले साधुषु उदासीनः। प्राकृतजनः कृताः परिजनाः सेवका येन सः। स्वकीयं सेवाधर्मं परित्यज्य स्वामिभावमंगीचकारेत्यर्थः। इयं त्रिदशतटिनी भागीरथी च उभयतटे म्लेच्छैराक्रान्ता अभिव्याप्ता। तस्मात् भवान् त्वं कथं स्याता स्यास्यति। अथवा किं तवैव सुकृती पुण्यवान् कुत्र विभयो भयरहितस्तत्कथय। देवेनोपेक्षितास्साधवः स्वधर्मपराङ्मुखश्च प्राकृतजनो म्लेच्छाक्रान्ता च भागीरथी; सत्येवं क्व सुकृतिनां सुखं कथं वा तेऽत्र स्थास्यन्तीति सरलार्थः। शिखरिणी वृत्तम् ॥ ६५ ॥

निस्सारावसुधाधुना समजनि प्रौढप्रतापनल-
ज्वालाजालसमाकुला द्विपघटासंघट्टविक्षोभिता।
म्लेच्छानां रथवाजिपत्तिनिवहैरुन्मीलिता कीदृशी-
यं विद्या भवितेति हन्त न सखे जानीमहे मोहिताः
॥ ६६ ॥

निस्सारेति- अधुनेदानीं म्लेच्छानां प्रौढस्य महतः प्रतापानलस्य प्रतापवन्हेर्ज्वालाभिः समाकुला अभिव्याप्ता, द्विपघटानां गजयूथानां संघट्टेन परस्परसंघट्टनेन विक्षोभिता स्वास्थ्याभावं प्रापिता रथा वाजिनः पत्तयः पदातयश्च तेषां समाहारस्तस्य, सेनांगत्वात् द्वन्द्वैकवद्भावः, निवहैः समूहैरुन्मीलिता आक्रान्तेत्यर्थः वसुधा निस्सारा निस्सत्वा समजनि जाता। जायतेर्लुङ्। इयं विद्या ब्रह्मविद्या कीदृशी भविता भविष्यतीति मोहिता वयं न जानीमहे। शार्दूलविक्रीडितं वृत्तम् ॥ ६६ ॥

वेदो निर्वेदमागादिह नमनभिया ब्राह्मणानां वियोगा-
द्वैय्यासिक्यो गिरोऽपि क्वचिदपि विरलाः साम्प्रतं सन्ति देशे।
इत्थं धर्मे विलीने यवनकुलपतौ शासति क्षोणिबिंबं
नित्यं गंगावगाहान्नवति गतिरितः संसृतेरर्यसिद्धौ ॥
॥ ६७ ॥

वेद इति—इहात्र देशे यवनकुलपतौ क्षोणिबिम्बं भूमण्डलं शासति सति वेदो नमनभिया नमनभयेन निर्वेदं वैराग्यमागात् प्राप्तवान्। ब्राह्म-

Digitized by Google

णानां वियोगादभावात् व्यासस्येमा गिरो वाचः पुराणान्यपि कचिद्विरलाः सन्ति । इत्थमेवं धर्मे विलीने नष्टे सति इत अस्मात्संसृतेः संसारादर्थसिद्धौ मोक्षे इत्यर्थः । नित्यं गंगावगाहाद्गंगास्नानात् गतिर्भवति । स्रग्धरा वृत्तम् ॥ १७ ॥

गंगा गंगेति यस्याः श्रुतमपि पठितं केनचिन्नाममात्रं
दूरस्थस्यापि पुंसो दलयति दुरितं प्रौढमित्याहुरेके ।
सा गंगा कस्य सेव्या न भवति भुवने सज्जनस्यातिभव्या
ब्रह्माण्डं प्लावयन्ती त्रिपुरहरजटामण्डलं मण्डयन्तीम् ॥ १८ ॥

गंगेति—यस्या गंगा गंगा इति नाममात्रं केनचित् पठितं श्रुतमपि वा तस्य पुंसः पुरुषस्य दूरस्थस्य दूरदेशे स्थितस्यापि सतः प्रौढं महत् दुरितं पातकं दलयति नाशयतीत्येके केचिदाहुः । उक्तञ्च " गंगा गंगेति यो ब्रूयाद्योजनानां शतैरपि । मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति " ॥ इति । सा अतिभव्या सर्वोत्तमा ब्रह्माण्डं निखिलं जगदित्यर्थः । प्लावयन्ती जलेन व्याप्नुवन्ती त्रिपुरहरस्य शिवस्य जटामण्डलं मण्डयन्ती भूषयन्ती गंगा भुवने जगति कस्य सज्जनस्य सेव्या न भवति । अपि तु सर्वस्य भवतीत्यर्थः । स्रग्धरा वृत्तम् ॥ १८ ॥

यत्तीरे वसतां सतामपि जलैर्मूलैः फलैर्जीवतां
मुक्ताहंममभावशुद्धमनसामाचारविद्यावताम् ।
कैवल्यं करबिल्वतुल्यममलं संपद्यते हेलया
सा गंगा ह्यतुलामलोर्मिपटला सद्भिः कुतो नेक्ष्यते ॥ १९ ॥

यत्तीरे इति—यस्यास्तीरेऽपि वसतां मुक्तोऽहंभावो मम भावश्च यैस्तेषाञ्चैतेषामाचारवतां धर्मचारिणां विद्यावतां विदुषां सतां साधूनाममलं शुद्धं कैवल्यं ब्रह्म करबिल्वतुल्यं करस्थितबिल्वफलवत्स्वाधीनमित्यर्थः । हेलया अनायासेन संपद्यते भवति । सा हि अतुला तुलारहिता, अमलाः स्वच्छा ऊर्मिपटलास्तरंगसमूहा यस्याः सा गंगा सद्भिः कुतो हेतोर्नेक्ष्यते नावलोक्यते । स्पष्टमन्यत् ॥ शार्दूलविक्रीडितं वृत्तम् ॥ १९ ॥

तीर्थानामवलोकने सुमनसामुत्कंठते मानसं
तावद्भूवलये सतां पुररिपुध्यानामृतास्वादिनाम् ।

Digitized by Google

यावत्ते न विलोकयन्ति सरितां रोचिष्णुमुक्तावलीं
श्रीमन्नाकतरंगिणीं हरजटाजूटाटवीविभ्रमाम् ॥ ७० ॥

तीर्थेति—भूवलये पुररिपोः शंकरस्य ध्यानमेवामृतमास्वादन्ते तच्छीलाश्लेषां, सुमनसां शोभनमानसानां सतां साधूनां मानसं मनः तीर्थानामवलोकने तावदुत्कण्ठते अभिलषति, यावत्ते हरस्य जटाजूटं केशकलाप एवाटवी अरण्यं तस्मिन् विभ्रमो विलासो यस्यास्तां सरितां नदीनां रोचिष्णुमुक्तावलीं भास्वन्मौक्तिकमालां श्रीमन्नाकतरंगिणीं श्रीभागीरथीं, श्रीमच्छब्दोऽत्र मंगलादरार्थः । न विलोकयन्ति । शार्दूलविक्रीडितं वृत्तम् ॥ ७० ॥

[1]संसारो विविधाधिबाधबधिरः सारायते मानसे
निःसारोऽपि वपुष्मतां कलिवृकग्रासीकृतानां चिरम् ।
दृष्टायां घनसारपाथसि महापुण्येन यस्यां सतां
सा सेव्या न कुतो भवेत्सुरधुनीस्वर्गापवर्गोदया ॥७१॥

संसार इति—घनसारः कर्पूर इव शुभ्रं पाथो जलं यस्यास्तादृश्यां यस्यां महापुण्येन दृष्टायां सत्यां चिरं चिरकालं कलिरेव वृकस्तेन ग्रासीकृतानां ग्रस्तानां वपुष्मतां प्राणिनां मानसे चित्ते विविधास्वाधीषु मनोव्यथासु 'पुंस्याधिर्मानसी व्यथा' इत्यमरः । बाधेषु पीडासु शारिरीषु च बधिर उदासनि इत्यर्थः । बाधिरो यथा कस्यापि निवेदनं न शृणोति संसारोऽप्ययं तथा व्याधिबाधितानां पीडा उपेक्षते इति भावः । तादृशो निःसारोऽपि संसारः सारायते स्थिरांश इवाचरति । 'सारोबले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु' इत्यमरः । सा एवंगुणविशिष्टा स्वर्गश्चापवर्गः मोक्षश्च तदर्थमुदयः प्रादुर्भावो यस्यास्तादृशी सुरधुनी भागीरथी सतां साधूनां सेव्या कुतो न भवेत् । अपितु भवेदेव । संसारे नानाव्याधिपीडितोऽपि जीवो यां दृष्ट्वा विगतपीडः सन् निःसारमपि संसारं सारवन्तं मनुते तां भागीरथीं साधवोऽवश्यमेव सेविष्यन्त इति सरलार्थः । शार्दूलविक्रीडितं वृत्तम् ॥ ७१ ॥

यस्याः संगतिरुन्नतिं वितनुते वारामभीषां जनै-

---

१ The MS. reads संसारे विविधाधिबाधबाधिरः सारायते तामसे निःसारेऽपि &c.

Digitized by Google

उद्गीता कविभिर्महेश्वरमनोभीष्टा महीमण्डले ।
सा सन्तः शरदिन्दुसोदरपयः पूराभिरामा नद-
त्कोकश्रेणिमनोजपुण्यपुलिना भागीरथी सेव्यताम् ॥७२॥

यस्या इति—हे सन्तः साधवः यस्या अमीषां पुरस्थितानां वारां जलानां संगतिः समागम उन्नतिं महत्वं वितनुते प्रयच्छति, या महीमण्डले पृथिव्यां कविभिर्व्यासादिभिर्जनैः उद्गीता उच्चैः स्तुता, या च महेश्वरस्य शिवस्य मनोऽभीष्टा प्रिया, सा शरदिन्दुसोदरः शरच्चन्द्रवन्निर्मलः पयसां जलानां पूरस्तेनाभिरामा मनोहरा, नदतां क्रीडतां कोकानां चक्रवाकाणां श्रेणयः समूहा मनोजो मदनश्च यत्र तच्चतत्पुण्यं पुण्यकारकं पुलिनं तीरं यस्याः सा भागीरथी सेव्यतामाश्रीयताम् । कर्मणि लोट् । अत्र मनोजपदं न कञ्चित्सदर्थं बोधयति तथापि लोचनानन्दजनकत्वान्मन्मथक्रीडास्थानमेतत्पुलिनमित्यर्थः सम्भाव्येतेति प्रतिभाति । शार्दूलविक्रीडितं वृत्तम् ॥ ७२ ॥

क्वचिद्धंसश्रेणी सुखयति रिरंसुः श्रुतिसुखं
नदन्ती चेतो नो विपुलपुलिने मंथरगतिः ।
तदेतस्या योऽर्थी सुरतरुलता नाकतटिनी
सदा सद्भिः सेव्या सकलपुरुषार्थाय कृतिभिः ॥७३॥

क्वचिदिति—एतस्या भागीरथ्या विपुले पुलिने तीरे क्वचित् स्थले रिरंसू रन्तुमिच्छुः । रमेः सन्नन्तादुः । अत एव श्रुतिसुखं श्रवणसुभगं श्राव्यमित्यर्थः । यथा स्यात्तथा नदन्ती कलं रुवन्ती मन्थरगतिर्मन्दगमना हंसानां श्रेणी पंक्तिर्नः अस्माकं चेतो मनः सुखयति प्रीणाति । तत्तस्मात्कृतिभिः सुधीभिः सद्भिः साधुभिः सकलः सर्वः पुरुषार्थो धर्मार्थकाममोक्षात्मकस्तस्मै । सुरतरोः कल्पवृक्षस्य लता कामदोग्ध्रीत्यर्थः नाकतटिनी स्वर्णदी भागीरथी सदा निरन्तरं सेव्या आश्रयणीया । अत्र योऽर्थीति पदद्वयं न सम्यगर्थं बोधयति । तथापि यः यः अर्थी पुरुषार्थाभिलाषी तैः सर्वैरित्येवार्थः संभाव्येतेति भाति । शिखरिणी वृत्तम् ॥ ७३ ॥

कच्छौ गंगा काश्यां त्रिपुरहरपुर्यां भगवती
प्रशस्तादेवानामपि भवति सेव्यानुदिवसम् ।
इति व्यासो ब्रूते मुनिजनधुरीणो हरिकथा-

Digitized by Google

सुधापानस्वस्थो गलितभवबंधोऽतुलमतिः ॥ ७४ ॥

कलाविति—कलौ युगे त्रिपुरहरस्य शंकरस्य पुर्यां काश्यां प्रशस्ता श्रेष्ठा भगवती सकलैश्वर्यसंपन्ना गंगा देवानामपि, किमु तर्हि मनुष्याणामिति भावः अनुदिनं नित्यं सेव्या भवति । इति मुनिजनानां धुरीणोऽग्रणीः सकलमुनिश्रेष्ठ इत्यर्थः हरेः परमात्मनः कथैव सुधा पीयूषं तस्याः पानेन स्वस्थः सुखावस्थितो, गलितो भवबंधः संसारबंधो यस्य तादृशः, अतुला मतिर्यस्य स व्यासो ब्रूते । शिखरिणी वृत्तम् ॥ ७४ ॥

यावज्जागर्ति चित्ते दुरितकलुषिते प्राणिनो वित्तपुत्र-
क्षेत्राद्यर्थेषु चिन्ता तदतिपरतया भ्राम्यमानस्य नित्यम् ।
तावन्नार्थस्य सिद्धिर्भवति कथमपि प्रार्थितस्यार्तिभाजा
कैवल्याख्यस्य लोके रमणसुखभुवो मुक्तदोषानुषक्तेः
॥ ७५ ॥

यावदिति—यावत् तदेव पुत्रादिकमेवातिपरं प्रधानं यस्य तस्य भावस्तया कर्त्र्या नित्यं सदा भ्राम्यमानस्य प्राणिनः दुरितेन पाप्मना कलुषिते चित्ते वित्तं धनं पुत्राश्च क्षेत्रं भार्या चादयो येषां तेष्वर्थेषु विषयेषु चिन्ता जागर्ति तावत् आर्तिभाजा भवपीडितेन तेनेति शेषः प्रार्थितस्येष्टस्य रमणस्य क्रीडायाः सुखस्य च भुवः स्थानभूतस्य, मुक्ता दोषानुषक्तिर्दोषसाहचर्यं यत्र तस्य दोषरहितस्य कैवल्याख्यस्य मोक्षाख्यस्यार्थस्य पुरुषार्थस्य सिद्धिः प्राप्तिः कथमपि केनापि प्रकारेण न भवति । स्रग्धरा वृत्तम् ॥७५॥

सन्त्यर्था मम सञ्चिता बहुधाः पित्रादिभिः साम्प्रतं
वाणिज्यैः कृषिभिः कलाभिरपि तान्विस्तारयिष्यामि
वः ।
हे पुत्रा इति भावयन्ननुदिनं संसारपाशावलीं
छेत्तार्यं तु कथं मनोरथमयीं जीवो निरालम्बनः
॥७६॥

सन्तीति — हे पुत्राः पित्रादिभिः सञ्चिता मम बहुविधाः सुवर्णधान्याद्यात्मका अर्थाः सन्ति । तानर्थान् वो युष्मदर्थं वाणिज्यैः कृषिभिः कलाभिरपि वा विस्तारयिष्यामि; इत्येवमनुदिनं नित्यं भावयन् चिन्तयन्नयं निरालम्बनो निराश्रयो जीवो मनोरथमयीं मनोरथप्रचुरां संसारपाशावलीं

Digitized by Google

कथं छेत्ता छेत्स्यति । साभिलाषस्य न मोक्ष इति भावः ॥७६॥

जानन्नेव करोति कर्म बहुलं दुःखात्मकं प्रेरितः
केनाप्यप्रतिवाच्यशक्तिमहिना देवेन मुक्तात्मना ।
सर्वज्ञेन हृदिस्थितेन तनुमत्संसाररंगांगणे
माद्यबुद्धिनटीविनोदनिपुणो नृत्यत्यनंगप्रियः ॥७७॥

जानन्निति—अनंगप्रियो विषयासक्तो माद्यन्त्याःप्रमत्तायाः बुद्धिरूपिण्या नट्या विनोदे निपुणः तनुमतां प्राणिनां संसार एव रंगाङ्गनं रंगभूमिस्तस्मिन्नृत्यन् प्राणी मुक्तात्मना मुक्तस्वभावेन सर्वज्ञेन हृदिस्थितेन केनापि कर्त्रा अप्रतिवाच्ये प्रतिवक्तुमशक्ये शक्तिर्बलं महि माहात्म्यञ्च यस्य तेन देवेन प्रेरितश्चोदितः दुःखात्मकं जानन्नेव बहुलं कर्म करोति, देहिनः खलु हृदि स्थितेन परमेश्वरेण नियोजिता दुःखात्मकं कर्म कुर्वन्तीति भावः। तथा चाह भगवान् श्रीकृष्णः "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन्सर्वभूतानि यन्त्रारूढानिमायया" (श्रीमद्भगवद्गीता)

को देवो भुवनोदयावनकरो विश्वेश्वरो विद्यते
यस्याज्ञावशवर्तिनो जलधियो नाप्लावयन्ति क्षितिम् ।
इत्याम्नातमपीश्वरं सुरशिरोरत्नं जगत्साक्षिणं
सर्वज्ञं धनयौवनोद्धतमना नो मन्यते बालिशः ॥७८॥

क इति—जलधियः समुद्रा यस्य आज्ञावशवर्तिनः आज्ञापराधीनाः सन्तः क्षितिं पृथ्वीं नाप्लावयन्ति नाक्राम्यन्ति । भुवनानां चतुर्दशसंख्यकानामुदयं सर्गभवनं रक्षणञ्च करोतीति सः, विश्वेषां सर्वेषामीश्वरः स्वामी देवः को विद्यते । न कोऽपीत्यर्थः । इत्येवं धनञ्च यौवनञ्च ताभ्यामुद्धतं प्रमत्तं मनो यस्य स बालिशो मूर्खः सुराणां देवानां शिरोरत्नं शिरोभूषणं सर्वदेवश्रेष्ठमित्यर्थः आम्नातं वेदैराख्यातमपीश्वरं नो मन्यते । अन्यत् स्पष्टम् । शार्दूलविक्रीडितं वृत्तम् ॥ ७८ ॥

कस्येमौ पितरौ मनोभवव्यथा तापेन संयोजिता—
वन्योन्यं तनयादिकं जनयतो भूम्यादिभूतात्मभिः ।
इत्थं दुःस्थमतिर्मनोभवरतिर्यो मन्यते नास्तिकः
शान्तिस्तस्य कथं भवेद्धनवतो दुष्कर्मधर्मश्रमात् ॥७९॥

कस्येति—इमौ पितरौ मातापितरौ कस्य न कस्यापीत्यर्थः । यतः मनोभवव्यथा तापेन मदनजन्यतापेनेत्यर्थः । अन्योन्यं परस्परं संयोजितौ

Digitized by Google

भूम्यादिभूतात्मभिः पृथिव्यादिमहाभूतपञ्चकेन तनयादिकं जनयत उ-त्पादयतः। इत्थं दुःस्था चञ्चला मतिर्बुद्धिर्यस्य सः, मनोभवे मदने रतिः प्रीतिर्यस्य स नास्तिको मन्यते। अतो धनवतो धनिनः लक्ष्मीमदान्धस्ये-त्यर्थः तस्य दुष्कर्मणि असत्कर्मणि दुर्धर्मेऽसद्धर्मे च श्रमस्य शान्तिः कथं भवेत्। नैव भवेदित्यर्थः। शार्दूलविक्रीडितं वृत्तम् ॥ ७९ ॥

हिक्काकासभगंदरोदरमहामेदज्वरैराकुलः
श्लेष्माद्यैरपि निद्रया विरहितो मन्दानलोऽल्पाशनः।
तारुण्येऽपि विलोक्यते बहुविधो जीवो दरिद्रेश्वरो
हा कष्टं कथमीदृशं भगवतः संसारदुःसागरे ॥ ८० ॥

हिक्केति—तारुण्येऽपि हिक्कादिरोगैः श्लेष्माद्यैरपि रोगविशेषैराकुलः पीडितो निद्रया विरहितः, मन्दोऽनलो जठराग्निर्यस्य सः, अल्पमशनं यस्य सः, दरिद्रेश्वरो महादरिद्रः, एवं बहुविधो जीवो विलोक्यते। हा इति खेदे भगवत ईश्वरस्य संसार एव दुःसागरस्तस्मिन्नीदृशं कष्टं दुःखं कथं वर्तते। शार्दूलविक्रीडितं वृत्तम् ॥ ८० ॥

माद्यत्तार्किकतान्त्रिकद्विपघटासंघट्टपञ्चानन-
स्तद्वद्दम्भकदन्तवैद्यककलाकल्पोऽपि निष्किञ्चनः।
यत्र क्वापि विनाशया कृशतनुर्भूपालसेवापरो
जीवन्नेव मृतायते किमपरं संसारदुःसागरे ॥ ८१ ॥

माद्यदिति—माद्यन्तः प्रमत्तास्तार्किका नैय्यायिकास्तांत्रिका ज्ञातसिद्धा-न्तास्तंत्रशास्त्रविदश्च त एव द्विपा गजास्तेषां घटानां समूहानां संघर्षेषु प-ञ्चाननः केसरी, महातांत्रिको महानैय्यायिकश्चेत्यर्थः। तथापिनिष्किञ्चनो दरिद्रः यत्र क्वापि कुत्रचिदपि आशयाधनाकांक्षया विना भूपालानां नृपाणां सेवापरः सेवासक्तः जीवन्नेव मृतायते मृत इवाचरति। संसार एव दुःसाग-रस्तस्मिन्नपरमन्यत्किम्, अस्तीति शेषः। संसारेऽस्मिन् सर्वेषामियमेवदशेति भावः। अत्र द्वितीयः पादो दुर्बोधः। शार्दूलविक्रीडितं वृत्तम् ॥८१॥

आढ्यः कश्चिदपंडितोऽपि विदुषां सेव्यः सदा धार्मिको
विश्वेषामुपजारको मृगदृशामानन्दकन्दाकरः।
कर्पूरद्युतिकीर्तिभूषितहरिब्रह्मण्डले गीयते
शश्वद्वन्दिजनैर्महीतनुभृतः पुण्यैर्न कस्योदयः ॥८२॥

आढ्य इति-कश्चिदाढ्यो धनवानपण्डितो मूर्खोऽपि विदुषां सेव्यो भवतीति

Digitized by Google

शेषः । विद्वद्भिः सेव्यत इत्यर्थः । सदा निरन्तरं धार्मिको धर्मं चरतीति तादृशः, विश्वेषां सर्वेषामुपजारको मोहजनकः । न ह्येनं परित्यज्यान्यत्र गच्छन्ति जनाः किन्त्वस्यानवरतं संनिधानमेवाभिलषन्तीत्यर्थः । मृगदृशां हरिणेक्षणानां सुंदरीणामिति यावत् आनन्दकन्दस्याकारः खनिः । कन्दो मूलं तेन युवतीनामत्यानन्दजनक इत्यर्थः । कर्पूरद्युतिर्धवलेत्यर्थः कीर्तिस्तया भूषिता हरितो दिशो येन स भूमण्डले पृथिव्यां वन्दिजनैः स्तुतिपाठकैः शश्वन्निरन्तरं गीयते स्तूयते । तत्रार्थान्तरं न्यस्यति महीतिं-मह्यां पृथिव्यां तनुभृतः प्राणिनः कस्य पुण्यैरुदयो न भवतीति शेषः । अपि तु सर्वेषामेवोदयः पुण्यैर्भवतीत्यर्थः । पुण्यैरेव धनावाप्तिर्धनावाप्तौ च सत्यामुदयस्तनुभृतो भवतीति पुण्यमेवोदयस्य निदानमिति भावः । पुण्यैरित्यत्र द्रव्यैरिति पाठः साधीयान् भवेत् । तथा च नीतिशतके " यस्यास्ति वित्तं स नरः कुलीनः स पंडितः स श्रुतिमान् गुणज्ञः । स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ते । शार्दूलविक्रीडितं वृत्तम् ॥८२॥

कर्तव्यं न करोति बंधुभिरपि स्नेहात्मभिर्बोधितः
कामित्वादभिमन्यते हितमतं धीरोप्यभीष्टं नरः ।
निष्कामस्य न विक्रिया तनुभृतो लोके क्वचिद्दृश्यते
यत्तस्मादयमेव मूलमखिलानर्थस्य निर्धारितम् ॥८३॥

कर्तव्यमिति—नरः पुरुषो धीरोऽपि पंडितोऽपि स्नेहात्मभिर्हितैषिभिर्न तु दुर्हृद्भिः बंधुभिर्बांधवैर्बोधित उपदिष्टोऽपि कामित्वात्कामाधीनत्वात्कर्तव्यं न करोति, हितानां मित्राणां मतं संमतमभीष्टमपि कर्म अभिमन्यतेऽवधीरयति । " अवमन्यते " इति युक्ततरं भवेत् । अपि च लोके जगति निष्कामस्य कामानधीनस्य तनुभृतः प्राणिनः विक्रिया विकृतिः पूर्वोक्ता क्वचिदपि न दृश्यते इति यत्तस्मादखिलस्य सर्वस्यानर्थस्यानिष्टस्य मूलमादिकारणमयमेव काम एवेति निर्धारितं निश्चितं मयेति शेषः । मूलपुस्तके तु 'निर्धारिनः' इति दृश्यते तन्न युक्तं प्रतीमः । शार्दूलविक्रीडितं वृत्तम् ॥ ८३ ॥

निष्कामा मुनयः परावरदृशो निर्धूतपाप्मोदया
निःसंगा निरहंकृता निरुपमानन्दं परं लेभिरे ।
यद्गत्वा न लुठन्ति मातृजठरे दुःखाकरे मानवा
दुर्गंधे पुनरेत्यकामकरे संसारपाथोनिधौ ॥ ८४ ॥

Digitized by Google

निष्कामा इति—निष्कामा भोगेच्छारहिताः, परस्मिन् भविष्यति अपरस्मिन् भूते दृक् दृष्टिर्येषां ते भूतभविष्यत्ज्ञानवन्तः, निर्धूतो नाशितः पाप्मनः पापस्योदयः प्रादुर्भावो यैर्निष्पापा इत्यर्थः। निःसंगाः संगरहिता विषयादिरागरहिता इत्यर्थः। स्मृतिरपि 'ध्यायतो विषयान्पुंसः संगस्तेषूपजायते' इति। निर्गतमहंकृतमहंकारो 'नपुंसके भावे क्तः' इति क्तः, येषां ते मुनयः परं सर्वोत्तमं निरुपमं तुलारहितमानन्दं ब्रह्माख्यं लेभिरे प्रापुः। यत् आनन्दं गत्वा प्राप्य मानवा मर्त्याः, कामभोगाद्यभिलाषा एव मकरा नक्रा यस्मिन् तस्मिन् संसारपाथोनिधौ संसारसागरे पुनरेत्यागत्य दुःखाकरे दुःखबहुले इत्यर्थः दुर्गंधे विण्मूत्रादिपूतिगंधो यस्मिन् तथाविधे मातृजठरे गर्भे न लुठन्ति न पतन्ति पुनर्जन्म न लभन्त इत्यर्थः। निष्कामाः पुरुष एव ब्रह्माधिगच्छन्तीति भावः। शार्दूलविक्रीडितं वृत्तम् ॥ ८४ ॥

कामस्यापि निदानमाहुरपरे मायां महाशासना
निश्चित्कां सकलप्रपञ्चरचनाचातुर्यलीलावतीम्।
यत्संगाद्भगवानपि प्रभवति प्रत्यङ्महामोहहा
श्रीरंगो भुवनोदयावनलयव्यापारचक्रेक्रियाः ॥८५॥

कामस्येति— अपरे केचित् महच्छासनं ज्ञानं येषां ते ब्रह्मज्ञानिनः। तथा च वैराग्यशतके रामर्षिः "महाशासने परमात्मज्ञाने स्फुरति सति" इति। कामस्यापि भोगेच्छाया अपि निदानमादिकारणं सकलस्य निखिलस्य प्रपञ्चस्य संसारस्य रचनायां निर्माणे चातुर्यं कौशलं लीला क्रीडा च तद्वती, लीलयैव प्रपञ्चनिर्माणकुशलामित्यर्थः। निश्चित्कां चैतन्यरहितां मायामाहुः। तामेव विशिनष्टि यदिति— यस्या मायाया संगात् प्रत्यक् प्रत्यक्शब्दवाच्यो भगवान् षाड्गुणैश्वर्यसंपन्नः, महामोहं हतवानिति स मोहनाशकः श्रीरंगो विष्णुरपि भुवनानामुदयावनलये उत्पत्तिस्थितिभंगरूपे व्यापारचक्रे कार्यचक्रे क्रियाः प्रभवति करोति। उपसर्गबलाद्धातूनामनेकार्थत्वाच्च सत्तार्थकादपि भवतेः करणेऽर्थे कट्। शार्दूलविक्रीडितं वृत्तम् ॥ ८५ ॥

तुल्यार्थेन त्वमैक्यं त्रिभुवनजनकस्तत्पदार्थःप्रपद्य
प्रत्यक्षं मोहजन्म त्यजति भगवति त्वंपदार्थोऽपि जीवः।

Digitized by Google

श्रुत्याचार्यप्रसादाभिरुपमविलसद्ब्रह्मविद्यस्तदैक्यं
प्राप्यानन्दप्रतिष्ठो भवति विगलितानाद्यविद्योपरीहः
॥ ८६ ॥

" तत्त्वमसि " इत्युपनिषन्महावाक्ये तच्छब्दवाच्यस्य ब्रह्मणः त्वंशद्वत्वाच्यस्य जीवस्य चासिशब्देनैक्यं दर्शितम्। तदेव पुनर्वैशद्येना-त्र प्रदर्शयति तुल्येत्यादिना—त्रिभुवनजनको जगत्स्रष्टा तत्पदार्थः " तत्त्वमसि " इति वाक्ये तच्छब्दप्रतिपादितोऽर्थो ब्रह्म इत्यर्थः। तथा च ब्रह्मणस्त्रिभुवनजनकत्वप्रतिपादिकाश्रुतिः "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व त-द्ब्रह्म " इति। तथा च सूत्रं " जन्माद्यस्य यतः " इति। तुल्यार्थेन स-मानार्थकेन त्वमा त्वंशब्देन त्वंशब्दवाच्यार्थेन जीवेनेत्यर्थः। ऐक्यं प्रपद्य प्राप्य मोहाज्जन्म यस्य तत्प्रत्यक्षं जगदयजति। त्वंपदार्थो जीवोऽपि श्रुतिश्चाचार्यश्च तयोः प्रसादात्कृपावशात् निरुपमातुल्य विलसन्ती च ब्रह्मविद्योपनिषद्ज्ञानं यस्य तादृशः, तदा तच्छब्देन तच्छब्दवा-च्येन ब्रह्मणेत्यर्थः ऐक्यं प्राप्य विगलिता विनष्टा अनाद्यविद्या माया उपरीहा मोक्षेच्छा च यस्य तथाविधः सन्नानन्दे ब्रह्मणि। तथा च श्रुतयः 'आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचन', 'आनन्दो ब्रह्मेति व्यजानात्' इत्यादयः। प्रतिष्ठा स्थितिर्यस्य तादृशो भवति ब्रह्मभावं प्राप्नोतीत्यर्थः। तत्त्वमसीत्याचार्योपदेशानन्तरं तच्छब्दवाच्यब्रह्माभिन्नः त्वंशब्दवाच्यः प्रत्य-गात्मा अहमेवेत्यधिगच्छन् जीवो ब्रह्मैव भवतिती विशदार्थः। अत्र भगवति पदं न कञ्चित्सदर्थं बोधयति। (पुस्तकान्ते टिप्पणी द्रष्टव्या) लिखि-तपुस्तके 'श्रुत्वाचार्ये' ति लभ्यते तथाप्यर्थानुसंधानात् 'श्रुत्याचार्ये' ति पाठोऽस्माभिः कल्पितः। स्रग्धरा वृत्तम् ॥ ८६ ॥

संन्यासो विहितस्य केशवपदद्वन्द्वे व्यधायि श्रुता
वेदान्ता निरवद्यनिष्कलपरानन्दाः सुनिष्ठाश्चिरम्।
संसारे वधबंधदुःखबहुले मायाविलासेऽव्ययं
ब्रह्मास्मीति विहाय नान्यदधुना कर्तव्यमास्ते क्वचित्
॥ ८७ ॥

सन्यास इति—वधो मृत्युर्बंधो बंधनञ्च ततो दुःखं तद्बहुले दुःखप्रचुरे, मायाया विलासे क्रीडाभूतेऽस्मिन् संसारे, विहितस्य वेदप्रतिपादितस्य

Digitized by Google

कर्मण इत्यर्थः केशवस्य परमात्मनःपदद्वन्द्वे चरणयुगले संन्यासः काम्यकर्म-त्यागः 'काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः" इति स्मृतिः । व्यधाय्यकारि । विपूर्वाद्धातेः कर्मणि लुङ् । सु सुतरां निष्ठा श्रद्धा येषु तादृशा निरवद्यः सर्वोत्तमो निष्कलो निरवयव आनन्दो ब्रह्म येषु ते ब्रह्म-विषयका इत्यर्थः वेदान्ता उपनिषदश्चिरं श्रुताः, इदानीमव्ययमक्षयं ब्रह्मा-स्मीति विहाय त्यक्त्वा क्वचिदन्यदपरं कर्तव्यं न आस्ते नास्ति । संन्यासि नामात्मज्ञानमेव परमिति भावः । शार्दूलविक्रीडितम् वृत्तम् ॥८७॥

हित्वा विश्वाद्यवस्थाः प्रकृतिविलसिता जाग्रदाद्यैर्विशेषैः
सार्धं चैतन्यधातौ प्रकृतिमपि समं कार्यजातैरशेषैः ।
ज्ञानानन्दं तुरीयं विगलितगुणकं देशकालाद्यतीतं
स्वात्मानं वीतनिद्रः सततमधिकृतश्चिन्तयेदद्वितीयम्
॥ ८८ ॥

हित्वेति—जाग्रदाद्यैर्जाग्रत्स्वप्नसुषुप्तिभिर्विशेषैः (अवस्थाभिः) सार्धं सह विश्वादयो विश्वतैजसप्राज्ञा अवस्थाः (अभिमानिनः) प्रकृतेर्मायाया विलसितं विलासो यासु ताः, अशेषैः सकलैः कार्यजातैर्यावत्कर्माभिः । जातशब्दः साकल्यार्थः । समं सह प्रकृतिमपि मोहञ्चापीत्यर्थः । चैतन्य-धातौ चिद्धातौ परब्रह्मणि, तथाच श्रुतिः" स एष चिद्धातुः " इति । स्मृ-तिरपि "पञ्चधातून् स्वयं षष्ठ आदत्ते युगपत्प्रभुः " इति । हित्वा विलयं नीत्वा अधिकृतः साधनचतुष्टयसंपन्नो वीता गता निद्रा यस्य स सावधानः सन् विगलितगुणकं निर्गुणं देशकालाद्यतीतं अनाद्यनन्त-मित्यर्थः ज्ञानमेवानन्दोऽस्मिन् तादृशं तुरीयं चतुर्थं महाकारणदेहस्य चतुर्थमभिमानिनं चिन्तयेत् । तथा च श्रुतिः " आत्मा वा अरेद्रष्टव्यो मन्तव्यो निदिध्यासितव्यः ' इति । वेदान्तेष्वद्वैतवादिनां मते स्थूलदेहो लिंगदेहः कारणदेहो महाकारणदेहश्चेति देहचतुष्टयं प्रसिद्धम् । तस्य जाग्रत्स्वप्नसुषुप्तितुर्या इति चतस्रोऽवस्थाः, विश्वतैजसप्राज्ञप्रत्यगात्मान इति चत्वारोऽभिमानिनः । तत्रस्थूलदेहस्य जाग्रदवस्था विश्वमभिमानी, लिंगदेहस्य स्वप्नावस्था तैजसमभिमानी, कारणदेहस्य सुषुप्तिरवस्था प्राज्ञ अभिमानी, महाकारणदेहस्य च तुर्यावस्था प्रत्यगात्माभिमानी । एवं जाग्रदादयोऽवस्था विश्वादयस्त्रयोऽभिमानिनश्चैतन्ये ब्रह्मणि लयं नीत्वा चतुर्थमभिमानिनं प्रत्यगात्मानं मुमुक्षुर्ध्यायेदिति विशदार्थः । अत्र

Digitized by Google

विश्वाद्यवस्था जाग्रदाद्यैर्विशेषैरित्युक्तं तत्र मूलं न बुध्यते । स्रग्धरा वृत्तम् ॥ ८८ ॥

* * * * * *

अग्रेपश्चादधस्तादुपरि च परितो दिक्षु धान्यास्वनादिः
कूटस्था संविदेका सकलतनुभृतामन्तरात्मानियंत्री ।
यस्यानन्दस्वभावा स्फुरति शुभधियः प्रत्यहं निष्प्रपञ्चा
जीवन्मुक्तः स लोके जयति गतमहामोहविश्वप्रपञ्चः
॥ ९० ॥

अग्र इति– यस्य शुभधियः शुद्धबुद्धेरग्रे पुरतः पश्चात्, अधस्तात्, उपरि, परितः समंतादिक्षु चानन्दस्वभावाऽऽनन्दस्वरूपा सकलतनुभृतामखिलप्राणिनामन्तरात्मनः प्रत्यगात्मनो नियंत्री नियामिका कूटस्था निर्विकारैका संवित् ज्ञानं प्रत्यहं नित्यं स्फुरति विलसति स लोके जगति गतो विनष्टो महामोहो विश्वः सर्वः प्रपञ्चः संसारश्च यस्य सं जीवन्मुक्तो जीवन्नेव मुक्तो जयति सर्वोत्कर्षेण वर्तते । आत्मज्ञानी जीवन् एव मुक्त इतिभावः । जीवन्मुक्तलक्षणं यथा " जीवन्मुक्तो नाम स्वस्वरूपाखण्डे ब्रह्मणि साक्षात्कृते सति अज्ञाततत्कार्यसञ्चितकर्मसंशयविपर्य्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठः " । श्रुतिश्च " भिद्यते हृदयग्रंथिरिछद्यन्ते सर्वसंशयाः" । तमेवविदिशन्ति श्रुतयः " सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव समना अमना इव सप्राणोऽप्राण इव " इत्यादयः । उक्तञ्चान्यत्र 'सुयुक्तवज्जाग्रति यो न पश्यति द्वयञ्च पश्यन्नपि चाद्वयत्वतः । तथापि कुर्वन्नपि निष्क्रियश्च यः स आत्मविन्नान्य इतीह निश्चयः' इति । अत्र धान्यास्विति पदं दुर्बोधम् । स्रग्धरा वृत्तम् ॥ ९० ॥

क्काहं ब्रह्मेति विद्या निरतिशयसुखं दर्शयन्ती विशुद्धं
कूटस्थं स्वप्रकाशं प्रकृतिसुचरिता खण्डयन्ती च मायाम् ।
क्काविद्याहं ममेति स्थगितपरसुखा चित्तभित्तौ लिखन्ती
सर्वानर्थाननर्थान् विषयगिरिभुवा **वासनागैरिकेण**
॥९१॥

क्केति–अहं ब्रह्मेत्येवंरूपा विशुद्धं कूटस्थं निर्विकारं स्वप्रकाशं ज्योतिःस्वरूपं नितरामतिशयसुखं दर्शयन्ती सुखस्वरूपेत्यर्थः । प्रकृतिसुचरिता शुद्धस्वभावा, मायाञ्च खण्डयन्ती नाशयन्ती विद्या ब्रह्मविद्या क्क । अहं,

Digitized by Google

मम, इत्येवमभिमानरूपा स्थगितं प्रतिबद्धं परमुत्कृष्टं सुखं यया दुःखस्वभावेत्यर्थः विषय एव गिरिः पर्वतस्तस्माद्भूतं तेन । भुवः किप् । वासना भोगेच्छैव गैरिकं गेरू इति प्रसिद्धं तेन चित्तमेव भित्तिः कुड्यं तत्र सर्वानखिलानर्थानेवानर्थाननिष्टान् दुःखान् लिखन्ती अविद्या माया क्व । महदन्तरं तयोरिति भावः । स्रग्धरा वृत्तम् ॥ ९१ ॥

अहं ब्रह्मास्मीति स्फुरदमलबोधो यदि भवे-
त्पुमान्पुण्योद्रेकादुपचितपरानर्थविरतिः ।
तदानीं काविद्या भृशमसहमानौपनिषदं
विचारं संसारः क्व च विविधदुःखैकवसतिः ॥ ९२ ॥

अहमिति—पुण्योद्रेकात्पुण्यातिशयाद्यदि अहं ब्रह्मास्मि इति स्फुरन्विलसन्नमलः शुद्धश्च बोधो ज्ञानं भवेत्तर्हि पुमान्मनुष्यः उपचिता प्राप्ता परानर्थानां सुदुःसहानिष्टानां विरामो येन तादृशो भवतीति शेषः ब्रह्मज्ञानिनः सकलानिष्टनाशो भवतीत्यर्थः । तदानीं ब्रह्मज्ञानावाप्तौ सत्यामौपनिषदमुपनिषत्संबंधिनं विचारमात्मचिंतनमित्यर्थः भृशमत्यन्तमसहमाना तद्विचारान्नाशमभिकांक्षन्तीत्यर्थः । अविद्या माया क्व, विविधदुःखानामेकवसतिर्मूलस्थानं संसारश्च क्व भवत इति शेषः । ब्रह्मज्ञाने स्फुरति सति संसारोऽविद्या च प्रणश्यत इति भावः । शिखरिणी वृत्तम् ॥ ९२ ॥

क्वचित्क्रन्दति कालकर्कशकराकृष्टं विनष्टं हठा-
दुत्कृष्टं तनयं विलोक्य पुरतः पुत्रेति हा हा क्वचित् ।
क्वचिन्नर्तकनर्तकीपरिवृतो नृत्यत्यहो कुत्रचि-
च्चित्रं संसृतिपद्धतिः प्रथयति प्रीतिञ्च कष्टञ्च नः ॥ ९३ ॥

क्वचिदिति—क्वचित्स्थले क्वचित् हठात्प्रसभं यथास्यात्तथा पुरतोऽग्रे कालस्य कर्कशकरैराकृष्टमुत्कृष्टं प्रियतममिति यावत् तनयं पुत्रं विनष्टं मृतमवलोक्य हा हा पुत्र इति क्रन्दति रोदिति । प्राचामिति योगविभागेन प्लुतस्य वैकल्पिकत्वादत्र संधिकार्यम् । तथा च " पुत्रेति तन्मयतया तरवोऽभिनेदुः " इति भागवतम् । अहो इत्याश्चर्ये कुत्रचिदन्यत्र क्वचित् नर्तका नटा नर्तक्यो वारांगनाश्च ताभिः परिवृतो नृत्यति महान्तमानन्दमनुभवतीत्यर्थः एवं संसृतिपद्धतिः संसारसरणिर्नोऽस्माकं प्रीतिं सुखमिति यावत् कष्टं दुःखञ्च प्रथयति जनयतीति चित्रं महदाश्चर्यम् । सुखदुःखात्मकोऽयं संसारः प्राणिनां यथाक्रमं सुखं दुःखञ्च जनयतीत्यहो कष्टमिति

Digitized by Google

भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ९३ ॥

नान्नं जीर्यति किञ्चिदौषधबलं नालं स्वकार्योदये
शक्तिश्चंक्रमणे न हन्त जरया जीर्णीकृतायां तनौ ।
अस्माकं त्वधुना न लोचनबलं पुत्रेति चिन्ताकुलो
ग्लायत्यर्थपरायणोऽतिकृपणो मिथ्याभिमानो गृही
॥ ९४ ॥

नान्नमिति-अतिकृपणोऽत एवार्थपरायणो धनसञ्चयतत्परो मिथ्या व्यर्थमभिमानो यस्य तथाविधो गृही गृहस्थो जरया वार्धक्येन तनौ देहे जीर्णीकृतायां सत्यां हे पुत्र अधुना वृद्धावस्थायामस्यामस्माकं, मिथ्याभिमानित्वादात्मन्यादराद्बहुवचनम् । अन्नं न जीर्यति, किञ्चिदौषधबलं स्वकार्योदये नालं न समर्थम् । औषधपानमपि निष्फलं भवतीत्यर्थः । हन्तेति खेदे चंक्रमणे चलने " नित्यं कौटिल्ये गतौ " इति सूत्रे यद्यपि ' न तु क्रियासमभिहारे ' इत्युक्तं दीक्षितेन तथापि ' तस्मात्क्रियासमभिहारे यङ् भवत्येवे ' ति शेखरकृद्वचनप्रामाण्यादत्र पौनःपुन्येऽर्थे यङ् । शक्तिर्बलं न, लोचनबलं न दृष्टिमान्द्यमपि जातमित्यर्थः इति मयीमां दशां प्राप्ते हे पुत्र मत्सञ्चितं धनं कथं रक्षितासीत्येवं चिन्तया आकुलो ग्लायति उत्तरोत्तरं क्षयति। जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः । जीवनाशा धनाशा च जीर्यतोऽपि न जीर्यति " इति भावः ॥ शार्दूलविक्रीडितं वृत्तम् ॥ ९४ ॥

अन्नायाय सदा रटन्ति पृथुकाःक्षुत्क्षामकंठास्त्रियो
वासोभी रहिता बहिर्व्यवहृतौ निर्यान्ति नो लज्जया ।
गेहादंगणमार्जनेऽपि गृहिणो यस्येति दुर्जीवितं
यद्यप्यस्ति तथापि तस्य विरतिर्नोदेति चित्रं गृहे ॥९५

अन्नेति– यस्य गृहिणो गृहस्थस्य पृथुका बालकाः सदा नित्यमन्नायान्नभोजनाय रटन्ति क्रोशन्ति । क्षुधा बुभुक्षया क्षामा कृशा कंठा यासां ताः स्त्रियो वासोभिर्वसने रहिता हीनाः सुवसनरहिताः सत्यो व्यवहृतौ व्यवहारार्थमंगणमार्जने अंगनसंमार्जनार्थमपि लज्जया गेहाद्बहिर्नो यान्ति न गच्छन्ति । इत्येवं दुर्जीवितं दुःखात्मकं जीवितं यद्यप्यस्ति तथापि तस्य गृहे संसार इति यावत् विरतिर्विरागो नोदेति न भवतीति चित्रं महदाश्चर्यम् । " क्षुत्क्षाम इति पदं शतकद्वयेऽपि दृश्यते । नीतिशतके यथा

Digitized by Google

" क्षुत्क्षामोऽपि जराकृशोऽपि " इति । वैराग्यशतके यथा " क्षुधा क्षामो जीर्णः " इति । शार्दूलविक्रीडितं वृत्तम् ॥ ९५ ॥

सद्वंशो गुणवानहं सुचरितः श्लाघां करोत्यात्मनो
नीचानां विदधाति च प्रतिदिनं सेवां जनानां द्विजः ।
योषित्तस्य जिघृक्षया स च कुतो नो लज्जते सज्जना-
ल्लोभान्धस्य नरस्य नो खलु सतां दृष्टुं हि लज्जाभय-
म् ॥ ९६ ॥

सदिति–द्विजो ब्राह्मणः अहं सद्वंशः कुलीनः सुचरितः सदाचार-संपन्न इत्येवं प्रकारेणात्मनः श्लाघां स्तुतिं करोति, प्रतिदिनं नीचानां जनानां सेवाञ्च विदधाति करोति । स द्विजः तस्य योषिद्भार्यां च जिघृक्षया गृहीतुमिच्छया धनाशयेति यावत् कुतोऽपि सज्जनान्नो लज्जते, हि तथाहि लोभान्धस्य नरस्य सतां सज्जनानां लज्जाया भयं न खलु नैवेत्यर्थः दृष्टम् । निर्लज्जाः खलु लोभिन इति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ९६ ॥

कामादित्रिकमेव मूलमखिलक्लेशस्य मायोद्भवं
मर्त्यानामिति देवमौलिविलसद्राजिष्णुचूडामणिः ।
श्रीकृष्णो भगवानवोचदखिलप्राणिप्रियो मत्प्रभु-
र्यस्मात्तत्त्रिकमुद्यतेन मनसा हेयं पुमर्थार्थिना ॥९७ ॥

कामेति–यस्मात्कारणात् देवानां मौलिषु मस्तकेषु विलसन्स्फुरन् भ्राजिष्णुर्देदीप्यमानश्चूडामणिः शिरोरत्नं सकलदेवानामधीश्वर इत्यर्थः अखिलानां सर्वेषां प्राणिनां प्रियो, मम प्रभुरीश्वरो भगवान् षडगुणैश्वर्यसंपन्नः श्रीकृष्णो मर्त्यानां देहिनामखिलक्लेशस्य सकलदुःखस्य मूलमादिकारणं मायया उद्भवो जन्म यस्य तत्कामादित्रिकं कामक्रोधमदात्मकमेवास्तीति शेषः । इत्येवमवोचत्कथितवान् । तथा हि– "त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः । कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्" ॥ (गीता अ० १६) तस्मात्पुमर्थान् धर्मादिपुरुषार्थानर्थयते तेन कर्त्रा उद्यतेन धीरेण मनसा करणेन तत्पूर्वोक्तं कामादित्रिकं हेयं त्याज्यम् । कामक्रोधमदाः प्राणिनामखिलदुःखहेतवः पुरुषार्थिभिस्त्याज्या एवेति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ९७ ॥

यत्प्रीत्यर्थमनेकधामनि मया कष्टेन वस्तु प्रियं

Digitized by Google

स्वस्याशाकवलीकृतेन विकलीभावं दधानेन मे ।
तत्सर्वं विलयं निनाय भगवान् यो लीलया निर्जरो
मां हित्वा जरयाकुलीकृततनुं कालाय तस्मै नमः ॥९८

यदिति—निर्जरो जरारहितो भगवान् सकलैश्वर्यसंपन्नो यः मे ममात्मन इति यावत् प्रीत्यर्थं संतोषाय अनेकधामनि नानास्थलेषु स्वस्यात्मन आशयोपभोगेच्छयेत्यर्थः कवलीकृतेन ग्रस्तेन वासनाबद्धेनेत्यर्थः अतएव विकलीभावं व्याकुलत्वं दधानेन व्याकुलेनेत्यर्थः मया यत् प्रियं वस्तु संपादितमिति शेषः तत्सर्वं जरया वृद्धावस्थया आकुलीकृता तनुर्यस्य तथाविधं मां हित्वा परित्यज्यलीलया निनायापहृतवान् तस्मै कालाय कर्मणे नमः । शार्दूलविक्रीडितं वृत्तम् ॥ ९८ ॥

आयुर्वेदविदां रसाशनवतां पथ्याशिनां यत्नतो
वैद्यानामपि रोगजन्म वपुषो[1] ह्यन्तर्यतो दृश्यते ।
दुश्चक्षोत्कवलीकृतत्रिभुवनो लीलाविहारस्थितः
सर्वोपायविनाशनैकचतुरः कालाय तस्मै नमः ॥९९॥

आयुरिति—यतो यस्मात्कारणादायुर्वेदं वैद्यशास्त्रं विदितवतामायुर्वेदनिपुणानामित्यर्थः, रसानामौषधविशेषाणामशनमस्ति येषां तथाविधानां, यत्नतः प्रयत्नेन पथ्यं हितमश्नन्ति तच्छीलास्तादृशानां वैद्यानामपि वपुषोऽन्तः शरीर इत्यर्थः रोगाणां जन्म उद्भवो दृश्यते तस्माद्दुःखेन चक्षुर्योग्यः भीमदर्शनोऽशक्यदर्शनो वेत्यर्थः स चासावुत्कवलीकृतं ग्रस्तं त्रिभुवनं येन सः, लीलया क्रीडया विहारः संचारस्तेन स्थितः, सर्वेषामुपायानां विनाशने एकचतुरोऽद्वितीयकुशलः तस्मै तादृशाय कालाय नमः । शार्दूलविक्रीडितं वृत्तम् ॥ ९९ ॥

ते धन्या भुवने सुशिक्षितपरब्रह्मात्मविद्याजना
लोकानामनुरंजका हरिकथापीयूषपानप्रियाः ।
येषां नाकतरंगिणीतटशिलाबद्धासनानां सतां
प्राणा यान्ति लयं सुखेन[2] मनसा श्रीरंगचिन्ताभृताम्
॥ १०० ॥

---

१ The MS. has वपुष्यत्पुर्य &c.

२ Here the MS. reads सुखेन श्रीरंगचिंताभृतां.

Digitized by Google

त इति—भुवने जगति येषां प्राणाः नाकतरंगिण्या भागीरथ्यास्तटे तीरे शिलायां बद्धासनानामुपविष्टानामित्यर्थः मनसा श्रीरंगचिन्ताभूता श्रीकृष्णचिन्तनपराणां सतां सुखेन सुष्ठं यान्ति ते सुशिक्षिता चिरमभ्यस्ता परब्रह्मविद्या आत्मविद्या च यैस्तथाविधा लोकानामनुरंजकाः हरिकथैव पीयूषममृतं तस्य पानप्रिया जना पुरुषा धन्या सफलीकृतजन्मान इत्यर्थः। शार्दूलविक्रीडितं वृत्तम् ॥ १०० ॥

हे पुत्राः व्रजताभयं यत इतो गेहं जनन्या समं
रागद्वेषमदादयो भवतु वः पन्थाः शिवोऽमायया
काशीं साम्प्रतमागतोऽहमहह क्लेशेन हातुं वपुः
सर्वानर्थगृहं सुपर्वतटिनीवीचिश्रियामण्डिताम् ॥१०१॥

हे इति—हे पुत्राः यूयमिति शेषः जनन्या समं सह इतोऽस्मात्स्थानात् काश्या इत्यर्थः अभयं निर्भयं यथा स्यात्तथा गेहं व्रजत गच्छत। हे रागद्वेषमदादयः वो युष्माकं पन्थाः मार्गः शिवो भवतु। यूयमप्यत्र सुखेन यातेत्यर्थः। यतोऽहं साम्प्रतमिदानीं सर्वेषामनर्थानां गृहमाश्रयस्थानं वपुः शरीरं हातुं परित्यक्तुममायया निर्मोहेन पुत्रकलत्रादिमोहं परित्यज्येत्यर्थः सुपर्वतटिन्या भागीरथ्या वीचिश्रिया तरंगलक्ष्म्या मण्डितां भूषितां काशीमहह इति खेदे क्लेशेन कृच्छ्रादागतः अस्मीति शेषः। निर्ममो निरहंकारोऽहमिदानीं भागीरथीतटे तनूमिमां त्यक्तुं महता कष्टेनात्रागतोऽस्मि तत्ताहं पुनः परावर्तिष्येऽतो मामानीं युष्मन्मातरमिमां गृहीत्वा सुखेन गच्छतेति भावः। तथाच 'हा कष्टम्। राजाश्रितानां संपदामिदानीं कः प्रकारः' इत्युक्तवन्तं मंत्रिणं देवतिलकं प्रति विरक्तस्यात एव गृहं प्रत्यावर्तितुमनिच्छो राज्ञो भर्तृहरेरुक्तिर्भर्तृहरिनिर्वेदनाटके पञ्चमाङ्के 'अन्यं क्वचिदुपाश्रयन्तु पुरुषं भोगोन्मुखं संपदः। कामक्रोधमदा (दाः) पदानि भवतां भूयांसि मामुज्झतः (ताम्)। क्षन्तव्यं गुरुदैवतद्विजगणैः श्रीतानिदेशादहं विज्ञानेन विकृष्य निष्ठुरतरं नीये परब्रह्मणि ॥ (काव्यमाला) शार्दूलविक्रीडितं वृत्तम् ॥ १०१ ॥

---

१ The MS. reads इतः जनन्या &c. ....शिवो मायया.

Digitized by Google

यत्साक्षादभिधातुमक्षमतया शब्दाचनालिंगितं
कूटस्थं प्रतिपादयन्ति विलयद्वारा प्रपञ्चस्रजः ।
मोक्षाय श्रुतयो निरस्तविषयो ध्यानस्य चोच्छित्तये
तत्राद्वैतवने सदा विचरताच्चेतः कुरंगः सताम् ॥१०२॥

यदिति—निरस्तः परित्यक्तो विधिः कर्म याभिस्ताः कर्ममार्गमपाकुर्वत्य इत्यर्थः । श्रुतय उपनिषदो मोक्षाय प्राणिनां मुक्तये ध्यानस्य विषयध्यानस्येति यावत् उच्छित्तये नाशाय कूटस्थं निर्विकारं शब्दाद्यनालिङ्गितं शब्दशक्त्यगोचरमित्यर्थः यत् साक्षात्प्रत्यक्षमभिधातुं प्रतिपादयितुमक्षमतया सामर्थ्याभावेन प्रपञ्चस्रजः संसारमालाया विलयद्वारा प्रतिपादयन्ति जगतो मिथ्यात्वज्ञानादेवाद्वैतलाभ इत्येवं निवेदयन्तीत्यर्थः । तत्र तस्मिन्नद्वैतरूपे वने सतां सज्जनानां चेतःकुरंगश्चित्तहरिणः सदा निरन्तरं विचरतात् । आशिषि तोस्तातङ् । सज्जना निरन्तरमद्वैतमेव भजन्तामिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ १०२ ॥

बुधानां वैराग्यं सुघटयतु वैराग्यशतकं
गृहस्थानामेकं हरिपदसरोजप्रणयिनाम् ।
जनानामानन्दं वितरतु नितान्तं सुविशद-
त्रयं शेषव्याख्यागलिततमसां शुद्धमनसाम् ॥ १०३ ॥

इति श्रीभर्तृहरिविरचितं विज्ञानशतकं चतुर्थम् ।

बुधानामिति—एकं वैराग्यशतकम् हरिपदसरोजप्रणयिनां श्रीविष्णुचरणकमलप्रियाणां बुधानां विदुषां गृहस्थानां गृहस्थाश्रमिणां जनानां वैराग्यं सुघटयतु जनयतु । सुविशदानां शतकानामित्यर्थः । सुविशदत्रयमित्यत्र सुविशदेति विशेषणप्रयोगादेव विशेष्यार्थावगमात्केवलविशेषणप्रयोगो नासाधुः । तथा चाह वामनः- "विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ" इत्यादि । त्रयं नीतिशृंगारविज्ञानात्मकं शेषस्य परमात्मनो व्याख्या नाम तेन गलितं विनष्टं तमो मोहो येषां तेषामत एव शुद्धमनसां

---

१ The MS. reads यत्साक्षादलिधातुमतया शब्दाद्यनालिं गितः कूटस्थं प्रतिपादयंति विलयद्वारा प्रपंच स्त्रजः मोक्षाय श्रुतया निरस्तविधयेध्यानस्य वोच्छित्तये तत्राद्वैतवने सदा विचताकुरंगसतां ॥

Digitized by Google

जनानां नितान्तमत्यन्तमानन्दं वितरतु। नीतिशृंगरवैराग्यविज्ञानात्मकं शतकचतुष्टयं विदुषां मोदाय भूयादिति भावः। शिखरिणी वृत्तम् ॥ १०३ ॥

इति श्रीघुले इत्युपनामकानां भाऊशास्त्रिणां चरणारविन्दमिलिन्देन सूनुना कृष्णाभिधेन विरचिता प्रज्ञाभिदेयं श्रीभर्तृहरिविरचितविज्ञानशतकस्य टीका समाप्तिमगात्।

Digitized by Google

NOTES.

In this fourth Śataka, Bhartihari, the well known Author of the Śatakas or centuries of couplets, contemplates *Bramha* or the supreme soul. The word *vidnyân*, which is the title of this Śataka, has been variously rendered by different authors. Śankara in his commentary on Bhagwat Gitâ, III. 41, interprets it as अनुभव, which is translated as experience, by Mr. Tolang. (See Bhagwat Gitâ, page 25, line 495, Bombay Sans. series). Amarsinha has explained it thus:- "मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः"—Amar, I. धीवर्ग. This explanation has also been accepted by Râmarshi, Madhusûdan and many others. But I do not think that either of these renderings adequately apply here. For the author speaks here neither of his experience nor of any technical science. He speaks mostly of Brahma and the way to know it. I therefore render it as 'the contemplative knowledge of Brahma' Râmakrishna Bhatta Ghulê my Great-Great-Grandfather, annotator on the commentary of Madhusûdan, interprets it to mean the knowledge of *Vedânta*. He says "ज्ञानमितरशास्त्रीयं विज्ञानं वेदान्तजन्यमुभयमपि". Madhusudan also says "यद्वा ज्ञानं शास्त्राचार्योपदेशजं विज्ञानं निदिध्यासनं "विज्ञाय प्रज्ञां कुर्वीते' ति श्रुतेः।" Bhagavat Gitâ III. 41. In his commentary on Adhyâtma Râmâyana, Bhatta Bhâskara says- विज्ञानमात्मतत्त्वज्ञानम् । Comp. "राज्यञ्च विपुलं दत्वा विज्ञानञ्च ददौ विभुः" —Adhyâtma Râmâyana, Yuddha Kânda, 16-20. Also Comp. विज्ञानेन विकृष्य निष्ठुरतरं नीये परब्रह्मणि." "यौवन उपभुक्तविषयस्य चरमे वयसि वितृष्णस्य ते विज्ञानमीषत्करं भविष्यति. (See. Kâvyamâlâ, Bomb. Bhartrihari Nirvêda. V. 25 and P. 20 bottom.)

Stanza I.—In these lines, the author invokes Ganpati, instead of Bramha as in the other two Satakas, perhaps because, he is the God of knowledge which is the subject of the

Digitized by Google

present Sataka or perhaps he intends to show that he is a staunch follower of Advaita Vedantism. The Samâs in the first line is rather defective; व्याकुलाकाशदेशः cannot convey the meaning; it ought to have been व्याकुलीकृताकाशदेशः, which would destroy the metre. The word as read in the MS. is उग्रात्मदर्य्यो which is quite incorrect and meaningless. If it is read उग्रात्मदर्पो it would have twofold meaning. First 'whose self respect (आत्मदर्पः) is intense (उग्र);' secondly 'who was the pride (आत्मदर्प) of Ugra or Shankar.' But as I do not see any propriety in any of these meanings I prefere reading the word as I have done. I request the inteligent readers to suggest a better reading. उद्दण्डा = large; and परिघ = an iron club.

Ganêsha is the son of Shiva and Pârvati, or of Pârvati only, for according to one legend he sprang from the scurf of her body. He is the God of wisdom and the remover of obstacles; hence he is invoked and worshiped at the commencement of every important undertaking. He is usually represented with the head of an elephant. There are several legends accounting for his elephant-head. One of which runs thus—Sindurâsura, a demon, having obtained a boon from Brahmâ, became dangerously uncontrolable. Vishnu, prayed by the Gods who were persecuted and harassed by the invincible demon, formed himself into a foetus in the womb of Pârvati, in order to kill the demon. Learning this, the demon made his way into the womb of Pârvati and cut off the head of the foetus, which was afterwards replaced by that of an elephant, Gajâsura.—Vide Ganêsha Purâna.

The idea of Ganêsha's head being always swarmed with bees is very familiar with the sanskrit poets. Comp. "गंडोड्डीनालिमालामुखरितककुभस्ताण्डवे शूलपाणेः"—Mâlati Mâdhava, I.

St. 11.—The expressions यत्सत्तया शुचि विभाति and यदात्मभासा प्रद्योतितम् both appear to mean the same thing. still विभाति may be rendered by 'appears'; the first expression would then

mean 'because of whose existance the world appears clear.'

St. III.—मूत्रपुरीषकूपे would be a better reading than मूत्र-कुदर्पकूपे. The MS. reads मूत्रकुदर्पकूपे.

St. IV.—ब्रह्मामृतं भज=Drink the nectar of Brahma; or अमृत may be taken as an adjective of Brahma; the sentence would then mean 'Think of the eternal Brahma; Comp. "तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते।"—*Kâthaka Upanishad*, VI. 6. The meaning of the root भज् varies according to the noun with which it is connected. Here is an instance of the root भज् used in the Parasmai Pada. The root, though Ubhayapadî, is usually used in the Atmanêpada only.

St. VI.—There is a pun in this stanza. For the first meaning see Tika. For the second meaning the पदच्छेद should be thus—सा रोगिणी यदि भवेत् अथवा विवर्णा बाला प्रिया अशशिमुखी रसिकस्य पुंसः। शल्यायते हृदि तथा आमरणं कृशांग्याः यत् तस्य सा अविगतनिद्रसरोरुहाक्षी। The meaning is—As (यत्) even though the wowan be of low caste(विवर्णा) of sickly constitution (रोगिणी) of ugly countenance (अशशिमुखी and अविगतनिद्रसरोरुहाक्षी,) still she is dear to the lustful person, *i. e.* a lustful person does not shrink even from loving a worst possible woman, of whom he is enamoured. As also the death of that emaciated woman (कृशांग्याः) inflicts the pain of an arrow-wound (so the amour of a young woman is no real happiness. st. 5.) But as I do not think that it adds any beauty to the stanza, I have not given this meaning in the Tika.

St. VII.—The first line means, 'O brother! I have told (thee) that thou art the witness to this all;' (*i. e.* thou art free from all actions. Comp. एको देवः सर्व भूतेषु गूढः सर्वव्यापी सर्व भूतान्तरात्मा। कर्माध्यक्षःसर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च।

Now इष्टं करणीयं, (do what is desirable) in the next line, which appears contradictory to the first, may be taken to mean simply '*Gnothi Seauton*' Know thyself. The doctrine of Vedanta

Digitized by Google

Philosophy strongly denounces Karma or action. Śankar had, therefore, to fight very hard for the interpretation of the Śruti "आत्मा वा अरे द्रष्टव्यः श्रोतव्यः &c which ultimately goes to Karma or Kriyâ. He says "अतस्तद्विषया लिङ्गादयः श्रूयमाणा अप्यनियोज्यविषयत्वात्कुंठीभवन्त्युत्पलादिषु प्रयुक्तक्षुरतैक्ष्ण्यादिवत्। अहेयानुपादेयवस्तुविषयत्वात्। किमर्थानि तर्हि "आत्मा वा अरे द्रष्टव्यः श्रोतव्यः" इत्यादीनि विधिच्छायानि वचनानि? स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः। (See, Brahma Sûtra Bhâsya I. I. 4.)

Stanza VIII.-विश्वेश्वर lit. means the lord of the universe. He is the third deity of the Hindu triad, and is represented as applying ashes to his body, wearing ornaments of serpants, and practicing penance. निष्कंटके=free from thorns or enemies.

Stanza X.—The word सुगति here is in the interrogative sense and the answer is expected in the negative. The substance of the lines is, 'when such is the condition even of Gods, it is not at all possible for human beings to be in good condition.' (Vide text P. 4. Tîkâ.) उच्चैर्निमग्नानां=drowned deep.

Stanza XII.-गगननगर probably means गंधर्वनगर or the city of the Gandharvas. It is an imaginary city in the sky, probably the result of some natural phenomenon, such as mirage, called *fata morgana* It is generally used as a parable by the Vedânta Philosphers to illustrate the unreality of this world. In the Samâs गगननगराकारसदृशे the words आकार and सदृश being synonymous, one of them is superfluous. Here the Ms. is very incorrect; it reads गगनराकार &c.

Stanza—XV. Line First is altogether incorrect, and I cannot make any meaning out of it. The word अजरं in the line, occurs, as an adjective of Bramha also in Vairâgya Śataka. Comp. 'तस्मादनन्तमजरं परमं विकासि तद्ब्रह्म' &c 76.

Stanza XVI.—Here the constrction is somewhat peculiar the word ज्ञातुं having no object. The first half of of the stanza may be translated thus:— O mind! if thou canst know

Digitized by Google

this (Bramha) which is the destroyer of birth and death, and which cannot be indicated or pointed out.

Stanza XVII.—With all my troubles, I cannot make any meaning out of this stanza.

Stanza XVIII.— आक्षिप्त = overpowered, seized, seduced. For कदन्नेन Comp. कदशनमथवा वासरान्ते ततः किम् ।— Vairâgya Śataka 74; (See notes P. 118 Bom. Sans. Series 1885 edition) स्थिरमतिः = of steady mind; Comp. " अनिकेतस्थिरमतिर्भक्तिमान्मे प्रियो नरः " (Bha. Gitâ XII. 19) " स्थिरा परमार्थविषया मतिर्यस्य स स्थिरमतिः "— Śankara.

Stanza XIX.— The allusion here is to ध्रुव the son of Uttânapâda. When he was a child, Vishnu, pleased with his religious austerities ,elevated him to the skies as the Polar star. Hence the epithets सुचिरम् and ज्योतिः । प्रल्हाद or प्रऱ्हाद the son of Hiranyakasipu, a demon, became a worshiper of Vishnu. His father, thereon, subjected him to various cruelties, but he escaped death uninjured, on account of Vishnu's divine interposition and was at last given eternal rest.

Stanza XX.—A parallel line to the last करतलगतमपि नश्यति यस्य तु भवितव्यता नास्ति । ' Hitopadesha.

Stanza XXI.— अर्थार्थिततया = For the sake of begging alms. The compound may be thus solved without involving any difficulty. अर्थितं = याचनम् = begging. अर्थ + भावे क्तः by the rule ' नपुंसके भावे क्तः ' (Sidh. Kau 3. 3. 114.) अर्थानां धनानाम् अर्थितं याचनं यस्य स अर्थार्थितः । व्यधिकरणबहुव्रीहिः । " सप्तमीविशेषणे बहुव्रीहौ " (Sidh. Kau. 2. 2. 35.) इति ज्ञापकात् व्यधिकरणबहुव्रीहिरपि नापाणिनीय इति भाति । the word ending in क्त has been put next by the rule ' वाहिताग्न्यादिषु ' (Sidh. Kau. 2. 2. 37.) तस्य भावः तया । Comp. समगुणयोगप्रीतयः— Raghu VI. 85.

Stanza XXII.— आहृतमनाः = whose mind is absorbed ध्यानरसिकः = delighting in contemplation. Comp. ' कदा वाराण-

Digitized by Google

स्याममरतटिनीरोधासि वसन् '—Vairâgya Śataka, miscellaneous 10.

Stanza XXIV.— अध्यस्तम् = wrongly ascribed. माया, in the Vedanta Philosophy, means the illusion by virtue of which one considers the unreal universe as really existant and as distinct from the supreme spirit. अधिष्ठान and अधिकरण here mean the ground or the object which is represented otherwise by the illusion. तस्या उदये = at the consciousness that it is an illusion. Translation of the stanza is— Muraripu or the enemy of Mura must remain as the foundation & hence the Reality, at the rise of the consciousness of that illusion through which all this aggregate of sky, wind &c. overcast by the great *Mâyâ* appears to being as such, just as a serpent should appear to them where there is only a garland. For nowhere under the sun is illusion possible unless there is some ground object for it. The sum and substance of the lines is that as a person who has taken a rope for a serpent, when he understands that it is a delusion, at once perceives the real thing rope; so if we understand that the whole universe is nothing but a delusion, we shall easily know the real thing Bramha. This is the Philosophy of Śankara, and I believe it to have been borrowed by Bhartrihari from him. Śankara contends in right-earnest for this very idea in his Bhâsya, against the Vârtikakâras. See Śârîra Bhâsya I. 4; text P. 9. Tîkâ; and also notes on St. 7.

Stanza XXV.— चित् = Knowledge, Bramha. There are in Vedanta only three positive attributes of Bramha. It is, it sees or knows, and it delights. But Bramha is itself usually called knowledge and delight. Comp. ' विज्ञानं ब्रह्म ' । आनन्दं ब्रह्म । The third line means ' being indifferent to all the objects which are nothing but delusion.' भ्रमवपुस् Lit. means whose body is delusion, hence which is identical with delusion *i. e.* which is delusion itself.

Stanza XXVI - अत्यर्थं = from which अर्थ or reality has

Digitized by Google

gone away, *i. e.* unreal. Comp. यथार्थ. The संधि in अहोऽत्यर्थं is indefensible; in such cases संधि is prohibited by the rule 'ओत्' (Sidh. Kau. 1. 1. 15.) स्थिररतिः may be rendered as 'inseparably attached.' चपल is here equivalent to inconsiderate.

STANZA XXX.— संपत्तिगृहाः— संपत्तिर्गृहे येषां ते । गड्वादित्वात्सप्तम्याः परनिपातः । the seventh case is placed next by the rule 'गड्वादेः परा सप्तमी' *i. e.* In a बहुव्रीहि compound the seventh case occurs after the words गडु &c. Comp. गडुकंठः ।

STANZA XXXI — अभिमानोद्धतता appeared to me a correct reading for अभिमानोद्धता which again does violence to the metre.. An explanation has now suggested itself to me wherein, I think, no difficulty can involve. It is this:–the compound मिथ्याभिमानोद्धता should be made an adjective of धनावनरतिः; then the construction would be रे रे मदान्ध चित्त मोहबधिरा मिथ्याभिमानोद्धता भवताम् इयं धनावनरतिः व्यर्था । मिथ्याभिमानोद्धता is equivalent to 'upheld by false pride'. धनावनरतिः is here personified and hence the epithet मोहबधिरा.

STANZA XXXII.—सृणि is a kind of sharp weapon. यत् in the third line is superfluous. I render इष्टेच्छया by the desire of मोक्ष. पर्वन् is a holy day fixed by the astronomers, which is supposed to bear manifold fruit of charity than an ordinary one. They are the eclipse of the sun or moon, the moment of the sun's entering in a new sign of the Zodiac, &c.

STANZA XXXIII.— दृष्टार्थमात्रार्थिभिः = those who long for objects apprehensible only by means of senses. In this Stanza the poet refutes the doctrine of *Châruâka* who holds that *deha* or the body is the Âtmâ. He admits one प्रमाण *e. g.* प्रत्यक्ष or perception. The poet here asks his opponent as to why he burns the corpse of his relative if he considers it to be the *Âtma* (See introduction.)

Digitized by Google

STANZA XXXIV.— अशिवप्राणिनाम् = of sinful beings. अन्यथात्वं = otherwise. देवलोक may either mean the abode of Gods, or by *Karmadhâraya* it may mean the Gods themselves.

STANZA XXXV.—The कालसर्प, also called दृष्टिविष as opposed to the ordinary सर्प called आशीविष, is supposed to possess poison in its sight. Comp. 'कालिको नाम सर्पो यो दृष्टीविष उच्यते'— *Rigveda.*

STANZA XXXVII.—तुषिता is probably a kind of prickly plant though no authority can yet be found for it.

STANZA XXXVIII.—उत्क्रान्तिभाजः = subject to birth and death. Compare the last line 'तां काशीं परिहृत्य हन्त विबुधैरन्यत्र किं स्थीयते' — V. Ŝ. 96.

STANZA XXXIX.— समुदितं (Subs) Prosperity. It can not be taken as an adjective of साधन, for one किं then becomes superfluous. It means 'what are the means of our prosperity.

STANZA XLIII.—The MS. reads धारण्य which gives no sense; I read it as गंधारण्य, and render it as 'a forest of sandalwood. परमपदपदं = The पद or seat of परमपद or मोक्ष. वलभी means the uppermost part of a palace. Comp. 'दृष्ट्वा दृष्ट्वा भुवनवलभीतुंगवातायनस्था'— *Mâlatî Mâdhava.*

STANZA XLIV.—The Compound संकरासीमगंग as it stands in the MS. gives no sense. I have therefore corrected it as शंकराशीर्षसंगं meaning which is spread all over the head of *Ŝankar.*

STANZA XLVI.— There is a pun in the word मानसे. It means mind, as also the lake Mânas.

STANZA XLVII.—Comp. नाभ्यस्ता भुवि वादिवृन्ददमनी विद्या विनीतोचिता and न नटा न विटा न गायका न परद्रोहनिबद्धबुद्धयः । नृपसद्मनि नाम के वयं कुचभारानमिता न योषितः । V.Ŝ. 89 and 27.

Digitized by Google

STANZA LI.— कन्दाम्बुपर्णाशिनाम् Comp. वाताम्बुपर्णाशिनाम्- Śringâra Śataka 95

STANZA LII.— स्रगादौ = In garlands &c. Hence it means in all the objects of pleasure.

STANZA LV.— वपुरंधकूपे– In the well of the body full of darkness. In the body, the deep dungeon of darkness. Comp. 'चित्तं गृहादद्य महान्धकूपरूपाद्गुरूपासनयोद्धृतं नः' – Bhartrihari Nirvêda. V. 7. सहनीयतेजः Comp. नमः शान्ताय तेजसे – V. S.

STANZA LVI.— Comp. कः कुर्वीत शिरः प्रणाममलिनं म्लानं मनस्वीजनो । यद्वित्रस्तकुरंगशावनयना नस्युः स्मरास्त्रं स्त्रियः–Ś. Ś. 11.

STANZA LVII.–This seems to have been said by the poet of his wife. The reference here is to a story told about him which runs thus: When Bhartrihari, disgusted with the worldly concerns refused all pleasures to himself, and set out for Benares to devote his remaining days to religious austerities his wife tried her utmost to persuade him to return home. But in spite of all her entreaties, he retired to Banâras and there devoted himself to the worship of *Shiva*. See *Bhartrihari Nirvêda Nâtaka* acts IV and V. also see text St. 101.

STANZA LIX.–विरतिविरसा भुक्ता यस्मात् here both the words विरति and विरसा are synonyms. **Telang* renders विरति which is a noun there, as indifference to worldly pleasures. †*B Wortham* interprets विरसा to mean devoid of pleasure. The whole expression is therefore epuivalent to 'because a woman, if enjoyed, becomes devoid of the capability of giving pleasure विषयविरसैः=Indifferent to worldly pleasures.

STANZA LXII.–The pronoun एतद् is used only to point out things at hand. एते must therefore refer to some ideal person

---

* See *Vairagya Sataka 79.* and Notes P. 55 Bomb. Sans. series.

† See Trubner's edition of *Bhartrihari* P. 50, st. 80.

Digitized by Google

standing before the mind's eye of the poet, while writing the stanza. It may perhaps refer to Śankar who, it seems, was very much admired by *Bhartrihari*. भ्रान्तवत्=like an insane man. The root त्यज् though exclusively *Parasmaipadi* is here used in the *Atmanêpada* by the rule कर्तरिकर्मव्यतिहारे (*Sidh. Kau.* 1. 3. 14) which means, 'when an exchange of functions or actions is to be expressed, a root takes Atmanêpada terminations, in the active sense. 'यत्र अन्यसंबंधिनीं क्रियामन्यः करोति इतरसंबंधिनीञ्चेतरः स कर्मव्यतिहारः'—*Wâmana*. जानन्तोऽपि भ्रान्तवत् अभिमानं न त्यजन्ति is the present instance. Here the कर्म of not giving up pride (अभिमान) belonging to the fools (भ्रान्त), is performed by the wise (जानन्तुः) *i. e.* those who are not fools. Hence त्यज् takes *Atmanêpada*. The prefix व्यति as in व्यतिलुनीते &c. is not necessary. Comp. 'द्रक्ष्येऽहं परमेश्वरि त्रिपथगं भागीरथि स्वं वपुः'—*Valmiki*. also 'एकार्णवेहिशयनात्ततः स तदृशे च तौ'—*Saptasâti* I. 72. '*ददृशें कर्मव्यतिहारे तङ्' *Rajaram Bhatta Ghulê*. 'संप्रहरन्ते राजानः'—*Bhattoji Dikshita*.

Stanza LXIII.—The root यत् thorgh Atmanepadi is here used in the Parasmaipada. Comp. यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् । यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः—*Bhagawat Gitâ* XV. 11. and see *Madhusûdana's* commentary on it. See also *Tika* P. 25. तत्र cannot be properly rendered. It is here equivalent to तेषाम् or their; but तत्र never means तेषाम् । The nominative of विधत्ते is कृत्यम् । For a similar idea compare *Bhâminîvilas* 'उपनिषदः परिपीता गीता च हन्त मतिपथं नीता । तदपि न हा विधुवदना मानससदनाद्बहिर्याति' ।

Stanza LXIV.— श्रुतिसमधिगतः = who has acquired the knowledge of Bramha. प्रत्यगात्मा means individual soul. प्र-

---

* See दुर्गादंशोद्धार (*Benares*)

त्यक् lit. means that which pervades every thing. प्रत्येकम् अञ्चति अश्नुते ; सर्वज्ञे– *Târânâtha. Sankar* has explained the word प्रत्यगात्मा thus:— " * प्रत्यक् चासावात्मा चेति प्रत्यगात्मा प्रतीच्येवात्मशब्दो रूढो लोके नान्यस्मिन् । व्युत्पत्तिपक्षेऽपि तत्रैवात्मशब्दो वर्तते । 'यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह । यच्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्यते' इत्यात्मशब्दव्युत्पत्तिश्रवणात् । तं प्रत्यगात्मानं स्वस्वभावमैक्षत् पश्यतीत्यर्थः'। (See introduction.) The poet here argues, if the Atma or soul which has acquired the knowledge of Bramha, is free from merit or sin why should men practice penance. For the idea that the soul which has acquired the knowledge of *Bramha* is free from merit and sin compare 'न वर्त्तते कर्मणा नो कनीयान्' । 'नैनं पाप्मा (पाप्मा पुण्यपापलक्षणः । शां. भा.) तरति सर्वं पाप्मानं तराति नैनं पाप्मा तपति सर्वं पाप्मनं तपति ' । 'नैनं कृताकृते तपतः' *Brihadâranyakopanisad* 4. 4. 23, 22. compare too *Gitâ* बुद्धियुक्तो जहातीह उभे सुकृत दुष्कृते ' । II. 50.

Stanza LXV.–कृतपरिजनः प्राकृतजनः means the vulgar classes or *Südras* have employed servants to serve them. This was at that time supposed to be one of *the greatest violation against religion*, the duties of the *Südras* being to serve and not be served. No better interpretation of the expression seems possible.

Stanza LXVII–The *Yavana* king in this stanza and the *Mlëcchas* in the preceeding one refer perhaps to the king *Saka* defeated by *Vikramâditya*, in the battle of Korur, in A. D. 544.

The description of the *Saka* given by Albiruni in his account of the battle of *Korur*, coincides with that given by *Bhartrihari* in these lines. "*Saka*", says he, "is the name of a prince who reigned over the countries situated between the Indus and the sea. His residence was in the centre of the empire, in the country named *Aryâvarta*. The Indians represent him as born in another class than that of the sákyûs; some pretend that he was

* See *Kathakopanisad* 4. 1. *Sankar Bhasya*.

Digitized by Google

a sûdra and a native of the town of Mansura. ..... The People had much to suffer from his despotism untill they received aid from the east. *Vikramâditya* marched against him put his army to flight and killed him in the territory of *Korur* situated between Multan and the castle of Luny." * (See introduction.)

STANZA LXXII-Here the word मनोज is superfluous, as it gives no suitable meaning. The word may perhaps be taken to mean that the bank was so pleasant that the God of love had made it his residence or park. By the rule अदसस्तुसंनिकृष्टे the pronoun अदस् is used only when proximity or vicinity is implied. Hence from the epithet अमीषां in this stanza, we may safely infer that the poet was in Benares when he composed this *Sataka*. See text st. 101.

STANZA LXXVII- महि=Greatness. 'महिमहिमानम्'—*Shridhar*. Comp. 'नेशे महित्ववसितुं मनसान्तरेण'।-*Bhâgvatam* X. 14. The MS. is here very incorrect; it reads.— 'केनापि प्रतिवक्तु शक्तिमहिपा देवेन' &c.

STANZA LXXXI—The second line in this stanza is not intelligible.

STANZA LXXXII-Compare-'यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतिमान् गुणज्ञः। स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ते" ॥—*Nitisâtaka* 41. Compare too 'Dummôds sit dives, barbárus ipse plecet.'—*Ovid.*

STANZA LXXXV.-Here the MS. is very incorrect; it reads 'कामस्यापि निदान माहुरपरे माया शेषिणो। निश्चित्कां सकल प्रपंचरचनाचातुर्यलीला'। I have replaced शेषिणो by महाशासनाः which means, possessed of higher knowledge. Compare 'यस्मिन् महाशासने' — *Vairâgya Sataka 80;* and see *Telang's* notes P. 55

STANZA LXXXVI- In these lines the poet very nicely expresses his idea about the identily of the individual soul with

* See India: What can it teach as? P. 282, note.

Digitized by Google

the supreme soul or *Brahma*. He wants to inculcate upon the mind of the reader that as soon as the illusion which conjures up the visions of the world vanishes, the individual soul gets itself identified with the *Brahma* and enjoys eternal happiness. The epithet भगवति is rather unintelligible. There are two sentences; the first is तत्पदार्थः प्रत्यक्षं त्यजति । and the second is जीवः तदैक्यं प्राप्य आनन्दप्रतिष्ठो भवति । Now if we take भगवति along with the first, the sentence would be तत्पदार्थः भगवति प्रत्यक्षं त्यजति which is not at all correct; for it evidently means that तत्पदार्थः and भगवान् are quite different, while it is not so; both the words mean the same thing. On the other hand if we take it along with the second, the sentence would be जीवः तदैक्यं प्राप्य भगवति आनन्दप्रतिष्ठो भवति which too involves the same difficulty. For तत् and भगवत् are the same thing. उपरीहा is equivalent to the desire of being elevated to स्वर्ग or Indra's paradise. उपरि literally means above; hence *Swarga*, which is supposed to be situated far above in the sky. स्वर्ग which is feasible साध्य is consequently destructible; hence it is undesirable. "It must be remembered that according to the Vedântic system the acquisition of Heaven or स्वर्ग is nothing compared to मोक्ष "— *Telang.* Comp. Gitâ 'कामात्मनः स्वर्गपराः' ।— II. 45 Comp. too 'किं वेदैः स्मृतिभिः पुराणपठनैः शास्त्रैर्महाविस्तरैः । स्वर्ग ग्रामकुटीनिवासफलदैः कर्मक्रियाविभ्रमैः " । — V. Ś. 81.

Stanza LXXXVIII.–This stanza is highly Vedântic. The old school of the Vedânta system had only three states of जीव or soul, जाग्रत्, स्वप्न and सुषुप्ति; selfconsciousness, consciousness, unconsciousness and their *Abhimânis* respectively विश्व, तैजस and प्राज्ञ. They had also only three देह; स्थूलदेह, लिंगदेह and कारणदेह. But it seems that the later philosophers added one देह more, the महाकारणदेह and have consequently added one अवस्था or state the तुर्या & one अभिमानी the प्रत्य-

Digitized by Google

गात्मा or the supreme soul. According to the first view तुरीय means शुद्ध ब्रह्म and according to the second it means the fourth अभिमानी प्रत्यगात्मा which is the same thing as शुद्ध ब्रह्म. Still I prefer the latter view as it gives a better sense in the present instance. (See Tîkâ). Also see "The variations (varied states) of the soul, viz. जाग्रदवस्था, सुषुप्त्यवस्था, स्वप्नावस्था waking, dreaming, sound sleep. The first is referred to विष्णु and सत्वगुण; the second to ब्रह्मदेव and रजोगुण; the third to शिव and तमोगुण; and they are termed respectively विश्व, तैजस and प्राज्ञ. To these three states, when the full consideration of the soul is to be entertained, two other are added, तुरीया and उन्मनी".— *Molesworth*. "वेदान्तिमते" says Târânâtha, "जाग्रत्स्वप्नसुषुप्तिरूपा जीवस्यावस्था मोक्षावस्था चेति चतस्रोऽवस्थाः" For the idea compare "समंकायशिरोग्रीवं धारयन्नचलं स्थिरादीन् विश्वतैजसप्राज्ञान् जाग्रत्स्वप्नसुषुप्तिक्रमेण कार्यकारणविनिर्मुक्ते पूर्णात्मनि उपसंहृत्य पूर्णात्मनावस्थित्वा 'ध्येयंतुरीयं देवं पूर्णानन्दं निरंजनम् अपूर्वानपरब्रह्म नेतिनेत्यादिलक्षणम्' अशनायाद्यसंस्पृष्टमनुदितानस्तमितज्ञानात्मनावस्थितं परं परमात्मानं नमो नम इति"— Śankara's Bhâsya on Sanat Sujâtîya, I. 6,

St. LXXXIX—The stanza as read in the MS. is thus— "मूर्ते स्वकाये श्रुतिरुदित कृपाणेति नेती नेत्यविद्यां। तन्मूलत्वानभीष्टमपनुदतियतो लोकसिद्धाविदंते॥ तस्मादाविद्यमेके जगति नरमते दृष्टनष्टस्वभावे द्विद्वांनपि देहपातं क्षणमपि मनसा ब्रह्मभूयं पिपासुः॥८९॥" I have not been able to correct this stanza. Intelligent readers are requested to correct it and let me know the corrections.

St. XC—The word धान्यासु is unintelligible. कूटस्था = "unmoved by aught"-Telang. "कूटस्थोऽप्रकंप्यो भवतीत्यर्थः"— Śankar. Telang has rendered कूटस्थ also by 'indifferent or passively looking on*". Śankar has also explained it thus—

*See *Bhagvat Gîtâ* P. 79, foot note (Bom. Sans. Series 1875)

Digitized by Google

" दृश्यमानगुणमन्तर्दोषं वस्तु कूटं कूटरूपं कूटसाक्ष्यमित्यादौ कूटशब्दः प्रसिद्धो लोके । तथा चाविद्याद्यनेक संसारबीजमन्तर्दोषवन्मायाव्याकृतादि-शब्दवाच्यतया ' मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ' ' मम माया दुरत्यया ' इत्यादौ प्रसिद्धं यत्कूटं तस्मिन्कूटे स्थितं कूटस्थं तद-व्यक्षतयाऽथवा राशिरिव स्थितं कूटस्थम्* " जीवन्मुक्तः = Liberated while living. Comp. " Disengaged from metempsychosis, and still in the body, the perfected sage is said to be untouched by merit and demerit, unsoiled by sin, uninjured by any thing he does or leaves undone. "—Gough.

St. XCI- विद्या = ब्रह्मविद्या=Knowledge of *Bramha*. दर्शयन्ती literally means pointing to; here it means leading to. For कूटस्थं see Stanza XC. अर्थ = meaning, sense, signification, its import.-*Apte'*. Here I render it by 'words.' The translation of the stanza is this.—There is a great difference between *Vidyâ* and *Mâyâ* or illusion. The former, which is naturally good destroys the illusion and leads to the highest happiness, unmixed by sorrow, stable and self existant; while the latter, which is itself pride and which is a great hindrance to the attainment of the higher happiness, writes the words of evils upon the board of mind, with the red chalk of desire produced in the mountain of sensual objects. comp 'ब्रह्मवेद ब्रह्मैव भवति। *Mundu*, 3, 2, 9 compare too "तदानीं काविद्या भृशमसहमानोपनिषदं विचारम्" St. 92.

Stanza XCII.—Compare-' शोधिततत्त्वपदार्थस्य अधिकारिणः तद्विजृंभितगुरुशास्त्रादिभ्यः तत्त्वमसीत्युपदेशेन अहं नित्यशुद्धबुद्धमुक्त-सत्यस्वभावपरमानंदानंताद्वयाखंड ब्रह्मास्मीति चित्तवृत्तिरुदयमासादयति तदानीमेव तत्स्वमखंडचैतन्यबलेन तत्परिपीडिताज्ञाननाशो भवति । तदानीं तत्कार्यस्य सर्वस्य नाशात् अभिव्यंजकवृत्तिरपि स्वयमेव कनकरजोवदहरुम-थनजनिताग्निवदुरस्यदुष्टजलशान्त्यर्थं पीततप्तजलवच्च नष्टा भवति । तदानीं ब्रह्मताभासोऽपि स्वोपाधिभूतवृत्तिनाशात् स्वप्रकाशात्मभावभासनासमर्थतया दर्पणविगमे तदुपाधिकस्य स्वाधिष्ठानमुखमात्रत्ववदधिष्ठानमात्रो भवतीति

* See *Sankar Bhâsya* Gita, XII. 3

वेदान्तसिद्धान्तरहस्यम् ।'—*Nrisinha saraswati*. Also see *Vedânta-sârâ*, PP. 98–102 (*Vyankatêshwara* Press edition, Bomb.).

Stanza XCV.— अन्नाशाय = अन + अश + भावे घञ् + ङे । The MS. here reads—अन्नामायया &c. The ण in अंगण is accounted for by the rule 'पृषोदरादीनियथोपदिष्टम्' by *Mukuta, Târânâtha and others*. While *Sârwadhara, Sabara, Bhoja* and others read अंगन instead of अंगण. Compare too, 'अंगनं प्रांगणे याने' *Vishwa*. Campare:—'अन्यथा प्रातराशाय कुर्य्याम त्वामलं वयम्'—*Bhatti Kâvya* VIII. 9.

Stanza XCVI.—The MS. reads the last line thus— लोभांधस्य नरस्य नोखलु सपातांहि लज्जाभयं ।

Stanza XCVII.—The words of *Bhagawân* Krishna, which were before the mind of the poet while writing this stanza are "त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः । कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् । "—Bhagawat Gitâ; XVI. 21.

Stanza CI.— The wife and sons of Bhartrihari who had retired to Benares for practising *yoga* had, it seems, gone there to take him home. But he asked them to go back as he did not care to go home again. For the second line compare—"कामक्रोधमदा (दाः) पदानि भवतां भूयांसि मामुज्झतः (ताम्)"—Bhartrihari-Nirveda. Compare, "यथेष्टं चर वैदेहि पन्थानः सन्तु ते शिवाः । कामारेरन्यत्र तायन्तां विशङ्कां त्यज मद्गताम् "— *Bhatti Kâvya*, XX. 25.

Stanza CII.—Compare "न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्"— Swet. upa. IV. 20. "अशब्दमस्पर्शम्"- Kâtha. upa. III. 15. "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह"— Tait. upa. II. 4. 9.

Stanza CIII.— The second line, if not taken along with the first, may induce one to believe the possibility of the existance of a fifth Sataka. But I do not think that there can possibly be any other Sataka of Bhartrihari, though some tanzas, which are ascribed to him, are not found in any of the

Digitized by Google

four Śatakas. I have therefore taken the first line along with the second in the Tikâ. The *Samâs* सुविशदत्रयं is rather defective according to some grammarians, as the adjective सुविशद is used without the noun it qualifies. *Wâman*, however, as quoted by prof. Ray in his edition of Raghu, says— "विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ ...., ' निधानगर्भामिव सागराम्बराम् ' meaning an attributive word alone may be used when it can point out its substantive without confusion. The last two lines of this stanza as read by the MS. run thus:— "नानामानंदं वितरतुनितांतं श्रुविशंद त्रयोशेषव्याख्याळिततमसांशुद्धमनसां।"

Digitized by Google

Copies can be had of:—

K. B. Ghule, Kelibag.

M. K. Padhye. B. A., B. L.
Editor 'Deshsevak'.

T. K. Telang, Mahal.

NAGPUR.

7716 - 13

Digitized by Google